No. 762.—There is elision OF YA coming AFTER A CONSONANT, when an *árdhadhátuka* affix follows. Thus (when, for example, the *árdhadhátuka* affix *ám* follows) the first letter (of the syllable *ya*) is elided in accordance with No. 88, and then the vowel is elided by No. 505, giving *vávrajáñchakre* "he went crookedly," *vávrajitá* "he will go crookedly."

रीगृदुपधस्य च । ७ । ४ । ९० ।

ऋदुपधस्य धातोरभ्यासस्य रीगागमो यङ्लुकोः । वरीवृत्यते । वरीवृतांचक्रे । वरीवृतिता ।

No. 763.—AND when *yań*, or a blank substituted for it, follows, let RÍK be the augment OF the reduplicate syllable of WHAT root HAS ṚI FOR ITS PENULT. Thus *varívṛityate* "he remains repeatedly," *varívṛitáńchakre* "he remained repeatedly," *varívṛititá* "he will remain repeatedly."

क्षुभ्नादिषु च । ८ । ४ । ३९ ।

णत्वं न । नरीनृत्यते । जरीगृह्यते ।

इति यङन्तप्रक्रिया ॥

No. 764.—AND IN the case of KSHUBH "to tremble" (which, as a verb of the 9th class, No. 730, becomes *kshubhná*), &c. there is not the substitution of the cerebral *ṇ* (notwithstanding No. 157). Thus *narínṛityate* "he dances repeatedly." (In accordance with (No. 763.) we have *jarígríhyate* "he takes repeatedly."

So much for the formation of "what ends in *yań*."

The verbs "that end with a blank substituted for *yań*" have next to be considered.

। यङ्लुगन्ताः ।

यङोऽचि च । २ । ४ । ७४ ।

यङोऽचि प्रत्यये लुक् स्याच्चकारात् तं विनापि क्वचित्। अनैमित्तिकोऽयम् । अन्तरङ्गत्वादादौ भवति । ततः प्रत्ययलक्षणेन यङन्तत्वाद्द्वित्वम् । अभ्यासकार्यम् । धातुत्वाल्लडादयः । शेषात् कर्तरीति परस्मैपदम् । चर्करीतं चेत्यदादौ पाठाच्छपो लुक् ।

No. 765.—And when the affix ach (No, 837) follows, there may be elision of yań. By the "and" it is signified that this may take place sometimes even without that affix :—and this is not the result of anything, assigned as the cause thereof, (whereas, in the other case, there was an assigned reason for the elision—viz. the affix *ach*). This elision takes place first, as it is independent of anything else (whereas the reduplication is dependent on the verb, the affix, &c). Then, after that, through the force of the affix (which remains, though the affix has been elided), since the verb is regarded as ending in *yań*, there is reduplication (No. 753), and the appropriate operations are to be performed on the reduplicate syllable. Since the word (through No. 502) is regarded as a root, the tense-affixes &c. are applicable to it. The *parasmaipada* affixes are employed in accordance with No. 412. As we read, in No. 636, that verbs with *yań* elided are to be regarded as belonging to the 2nd class, "*ad, &c.*," we infer that there is to be elision of *śap* (No. 589).

यङो वा । ७ । ३ । ९४ ।

यङ्लुगन्तात् परस्य हलादेः पितः सार्वधातुकस्येड्वा स्यात् । भूसुवोरिति निषेधो यङ्लुकि भाषायां न । बोभूतु तेतिक्ते इति छन्दसि निपातनात् । बोभवीति । बोभोति । बोभूतः । अदभ्यस्तात् । बोभुवति । बोभवांचकार । बोभवामास । बोभविता । बोभविष्यति । बोभवीतु । बोभोतु । बोभूतात् । बोभूताम् । बोभुवतु । बोभूहि । बोभवानि । अबोभवीत् । अबोभोत् । अबोभूताम् । अबोभवुः । बोभूयात् । बोभूयाताम् । बोभूयुः । बोभूयात् । बोभूयास्ताम् । बोभूयासुः । गातिस्थेति सिचो लुक् । यङो वेतीट्पक्षे गुणं बाधित्वा नित्यत्वाद्वुक् । अबोभूवीत् । अबोभोत् । अबोभूताम् । अबोभूवुः । अबोभविष्यत् ।

## इति यङ्लुगन्ताः ॥

No. 766.—Let *iṭ* be OPTIONALLY the augment of a *sárvadhátuka* affix distinguished by an indicatory *p*, commencing with a consonant, and coming AFTER a verb with YAṄ elided. The prohibition (of *guṇa*) by No. 474 does not, in secular language, extend to the case where *yaṅ* is elided. This is inferred from the fact that the form *bobhútu* in the *Veda* (in which *guṇa* is not substituted—) is one of those enumerated (in VII. 4. 65.—thus "*bobhútu tetikte* &c.,") among the irregularities. Thus we have *bobhavíti* or *bobhoti* "he is frequently," *bobhútah* "they two are frequently," substituting *at* for *jh*, by No. 645, as it is reduplicated, *bobhuvati* "they are frequently," *bobhaváṅchakára* or *bobhavámása* "he was frequently," *bobhavitá* "he will be frequently," *bobhavishyati* "he will be frequently," *bobhavítu* or *bobhotu* "let him be frequently," *bobhútát* "may he be frequently," *bobhútám* "let the two be frequently," *bobhuvatu* "let them be frequently," *bobhúhi* "be thou frequently," *bobhaváni* "let me be frequently," *abobhavít* or *abobhot* "they were frequently," *abobhútám* "they two were frequently," *abobhavuh* "they were frequently," *bobhúyát* "he may be frequently," *bobhúyátám* "they two may be frequently," *bobhúyuh* "they were frequently," *bobhúyát* "may he be frequently," *bobhúyástám* "may they two be frequently," *bobhúyásuh* "may they be frequently." According to No. 473, there is elision of *sich*. On the alternative of there being the augment *iṭ* from No. 766, there is the augment *vuk* from No. 425, this debarring *guṇa* (No. 420) because it presents itself *always* (whether *guṇa* is substituted or not —and therefore, according to one of the maxims of the Grammar, takes the precedence). Thus we have *abobhúvít* or *abobhot* "he was frequently," *abobhútám* "they two were frequently," *abobhúvuh* they were frequently," *abobhavishyat* "he would be frequently."

So much for those "that end with a blank substituted for *yaṅ*."

The "nominal verbs" have next to be considered.

## । नामधातवः ।

सुप आत्मनः क्यच् । ३ । १ । ८ ।

इषिकर्मण एषितुः संबन्धिनः सुबन्तादिच्छायामर्थे क्यच्वा ।

No. 767.—Let KYACH be optionally attached, in the sense of wishing, AFTER a word WITH A CASE-AFFIX expressing the object wished as connected with the wisher's SELF—(as, for example, a son,—when a man wishes to have a son of his own—not somebody else's son).

सुपो धातुप्रातिपदिकयोः । २ । ४ । ७१ ।

एतयोरवयवस्य सुपो लुक् ।

No. 768.—Let there be elision (*luk*) OF A CASE-AFFIX when part of these two—VIZ. OF A ROOT AND OF A CRUDE FORM (No. 135).

क्यचि च । ७ । ४ । ३३ ।

अवर्णस्य ईः । आत्मनः पुत्रमिच्छति पुत्रीयति ।

No. 769.—AND WHEN KYACH (No. 767) FOLLOWS, let *í* be the substitute of *a* or *á*. Thus *putríyati* "he wishes for a son of his own."

नः क्ये । १ । ४ । १५ ।

क्यचि क्यङि च नान्तमेव पदं नान्यत् । नलोपः । राजीयति । नान्तमेवेति किम् । वाच्यति । हलि च । गीर्यति । पूर्यति । धातोरित्येव । नेह । दिवमिच्छति दिव्यति ।

No. 770.—WHEN KYA—i. e. *kyach* or *kyań* (No. 776)—FOLLOWS, only what ends in N is considered a *pada*, and no other word. So, the *n* of *rájan* being elided by No. 200, we have *rájíyati* "he wishes for a king." Why do we say "only what ends in *n*?" Witness *váchyati* "he wishes for words," (which would otherwise, by No. 333, have changed the *ch* to *k*). By No. 651 the vowel is lengthened in *gíryati* "he wishes for words," and *púryati* "he wishes for a city;" but, since the lengthening directed by No. 651 applies only to a verbal root, it does not take place in the example *divyati* "he wishes for heaven."

क्यस्य विभाषा । ६ । ४ । ५० ।

हलः परयोः क्यच्क्यङोर्लोपो वार्धधातुके । आदेः परस्य । अतो लोपः । तस्य स्थानिवत्त्वाल्लघूपधगुणो न । समिधिता । समिध्यिता ।

No. 771.—When an *árdhadhátuka* affix follows, there is OPTIONALLY elision OF KYA—i. e. of *kyach* and *kyań*—coming after a consonant. According to No. 88 the elision here is that of the *y*, and a blank takes the place of the *a* by No. 505. Since the blank is regarded in the same light as that of which it took the place (No. 163), there is no substitution of *guṇa* by No. 485—and we have *samidhitá* or *samidhyitá* "he will wish for fuel."

काम्यच्च । ३ । १ । ९ ।

उक्तविषये काम्यच् । पुत्रमात्मन इच्छति । पुत्रकाम्यति । पुत्रकाम्यिता ।

No. 772.—AND under the same circumstances (No. 767), KÁMYACH may be added. Thus *putrakámyati* "he wishes for a son of his own," *putrakámyitá* "he will wish for a son."

उपमानादाचारे । ३ । १ । १० ।

उपमानात् कर्मणः सुबन्तादाचारेऽर्थे क्यच् । पुत्रमिवाचरति पुत्रीयति छात्रम् । विष्णूयति द्विजम् ।

No. 773.—Let *kyach*, IN THE SENSE OF TREATMENT, come AFTER a word with a case affix denoting THE object of COMPARISON. Thus *putríyati chhátram* "he treats the pupil as a son," *vishṇúyati dwijam* "he treats the Brahman as if he were Vishṇu.

सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः । अतो गुणे । कृष्ण इवाचरति कृष्णति । स्व इवाचरति स्वति । सस्वौ ।

No. 774.—"The affix KWIP SHOULD BE MENTIONED as coming OPTIONALLY AFTER PRONOUNS AND CRUDE NOUNS." Where the word is a crude noun and not a *pada*, No. 300 applies, and we may have *kṛishṇati* "he acts like Kṛishṇa," *swati* "he acts like himself," *saswau* "he acted like himself."

अनुनासिकस्य क्विझलोः क्ङिति । ६ । ४ । १५ ।

अनुनासिकान्तस्योपधाया दीर्घः स्यात् क्वौ झलादौ च क्ङिति । इदमिवाचरति इदामति । राजेव राजानति । पन्था इव पथीनति ।

No. 775.—A long vowel shall be the substitute for the penult OF what ends with A NASAL, WHEN KWIP (No. 855) FOLLOWS, OR an affix beginning with A JHAL and DISTINGUISHED BY AN INDICATORY K OR Ń. Thus *idámati* "he acts like this one," *rájánati* "he acts like a king," *pathínati* "it serves as a road."

**कष्टाय क्रमणे । ३ । १ । १४ ।**

चतुर्थ्यन्तात् कष्टशब्दादुत्साहे क्यङ् । कष्टाय क्रमते कष्टायते । पापं कर्तुमुत्सहत इत्यर्थः ।

No. 776.—The affix *kyań*, IN THE SENSE OF EXERTION, comes after the word KASHṬA "pain," with the 4th case-affix. Thus (the case-affix being elided by No. 768, and the final lengthened by No. 518) we have *kashṭáyate* "he is assiduous for trouble," i. e. "he is assiduous in the commission of sin."

**शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे । ३ । १ । १७ ।**

एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् । शब्दं करोति शब्दायते ।

No. 777.—The affix *kyań*, IN THE SENSE OF MAKING, comes AFTER these words, as the object of the action—viz. ŚABDA "sound," VAIRA "heroism," KALAHA "strife," ABHRA "a cloud," KAṆWA "sin," AND MEGHA "a cloud." Thus *śabdáyate* "he makes a noise."

**तत् करोति तदाचष्ट इति णिच् ।**

No. 778.—"In the sense of HE DOES THAT, or HE SAYS THAT," the affix *ṇich* may be employed.

प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च । प्रातिपदिकाद्धात्वर्थे णिच् स्यात् । इष्ठे यथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुब्लोपयणादिलोपप्रस्थस्फाद्यादेशभसंज्ञास्तद्वण्णावपि स्युः । इत्यग्लोपः । घटं करोत्याचष्टे वा घटयति ।

इति नामधातवः ॥

No. 779.—" The affix *ṇich* may come AFTER A CRUDE NOUN, WITH THE SENSE OF A VERB, IN AN INDEFINITE VARIETY OF WAYS, AND it shall be LIKE the affix ISHṬHA (No. 1306)." In like manner as, when *ishṭhá* is affixed, there is the masculine from (substituted for the feminine), the substitution of *r* (for *ṛi*), the elision of the last vowel with what follows it (No. 52), the elision of the affixes *vin* (No. 1281) and *matup* (No. 1268), the elision of what begins with *yaṇ* (as the *r* of the syllable *ra* in the word *dúra* "far"), the substitution of *pra* (for *priya*) *stha* for *(sthira) spha* (for *sphira*) &c. (see VI. 4. 157), and the denominotion *bha* (No. 185)—just so let there be also, when *ṇi* follows. Therefore, with the elision of *ak* (i. e. of the last vowel—No. 52—), we may optionally have *ghaṭayati* " he makes a jar," or "he calls it a jar."

So much for the " nominal verbs."

The class of words called " *kaṇḍú, &c.*" has next to be considered.

। कण्ड्वादयः ।

कण्ड्वादिभ्यो यक् । ३ । १ । २७ ।

एभ्यो धातुभ्यो नित्यं यक् स्यात् स्वार्थे । कण्डूञ् गात्रविघर्षणे । १ । कण्डूयति । कण्डूयते । इत्यादि ।

इति कण्ड्वादयः ॥

No. 780.—Let there be always YAK AFTER these roots—viz. KAṆḌÚ, &C.—without alteration of the sense.

Thus from the noun *kaṇḍú* " the itch " comes the verb *kaṇḍú (kaṇḍúñ)*, meaning "to itch or scratch." From this we have *kaṇḍúyati* or *kaṇḍúyate*—and so on.

So much for " *kaṇḍú, &c.*"

It is next to be considered under what circumstances the *átmanepada* affixes fall to be employed.

। आत्मनेपदम् ।

कर्तरि कर्मव्यतिहारे । १ । ३ । १४ ।

क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदम् । व्यतिलुनीते । अन्यस्य योग्यं लवनं करोतीत्यर्थः ।

No 781.—An *átmanepada* affix is employed IN DENOTING THE AGENT, WHEN THE INTERCHANGE OF THE ACTION IS to be expressed. Thus *vyatiluníte* "he performs a cutting (of wood, &c.) which was the appropriate office of another."

न गतिहिंसार्थेभ्यः । १ । ३ । १५ ।

व्यतिगच्छन्ति । व्यतिघ्नन्ति ।

No. 782.—An *átmanepada* affix is NOT employed (notwithstanding No. 781) AFTER WHAT verbs mean "to go" and "to injure." Hence *vyatigachchhanti* "they go against each other," *vyatighnanti* "they fight together."

नेर्विशः । १ । ३ । १७ ।

निविशते ।

No. 783.—An *átmanepada* affix is employed AFTER the verb VIŚ "to enter," coming AFTER NI. Thus *niviśate* "he enters in."

परिव्यवेभ्यः क्रियः । १ । ३ । १८ ।

परिक्रीणीते । विक्रीणीते । अवक्रीणीते ।

No. 784.—Also AFTER the verb KRÍ "to buy or sell," coming AFTER PARI, VI, OR AV. Thus *parikríṇíte* "he buys," *vikríṇíte* "he sells," *avakríṇíte* "he buys."

विपराभ्यां जेः । १ । ३ । १९ ।

विजयते । पराजयते ।

No. 785.—Also AFTER the verb JI "to conquer," coming AFTER VI OR PARÁ. Thus *vijayate* "he conquers," *parájayate* "he conquers."

समवप्रविभ्यः स्थः । १ । ३ । २२ ।

संतिष्ठते । अवतिष्ठते । प्रतिष्ठते । वितिष्ठते ।

No 786.—Also AFTER the verb SHṬHÁ "to stand," coming AFTER SAM, AVA, PRA, OR VI. Thus *saṅtishṭhate* "he stays with," *avatishṭhate* "he waits patiently," *pratishṭhate* "he sets forth," *vitishṭhate* "he stands apart."

अपह्नवे ज्ञः । १ । ३ । ४४ ।

शतमपजानीते । अपलपतीत्यर्थः ।

No. 787.—Also AFTER the verb JÑÁ "to know" (preceded by *apa*) IN THE SENSE OF DENYING. Thus *śatamapajáníte* "he denies (the debt of) a hundred (rupees)."

अकर्मकाच्च । १ । ३ । ४५ ।

सर्पिषो जानीते । सर्पिषोपायेन प्रवर्तत इत्यर्थः ।

No. 788.—AND AFTER (the verb *jñá* "to know") used (in certain senses) as AN INTRANSITIVE. Thus *sarpisho jáníte* "he engages (in sacrifice) by means of clarified butter."

समस्तृतीयायुक्तात् । १ । ३ । ५४ ।

रथेन संचरते ।

No. 789.—Also AFTER (the verb *char* "to go") coming after SAM, and CONNECTED WITH a noun in THE 3RD CASE. Thus *rathena saṅcharate* "he rides with (in) a chariot."

दाणश्च सा चेच्चतुर्थ्यर्थे । १ । ३ । ५५ ।

समो दाणस्तृतीयान्तेन युक्तादुक्तं स्यात् तृतीया चेच्चतुर्थ्यर्थे ।
दास्या संयच्छते कामी ।

No. 790.—Let the aforesaid (employment of the *átmanepada* affixes) take place AFTER the verb DÁ *(dán)* "to give," coming after *sam*, and connected with a noun in the 3rd case, PROVIDED THIS 3rd case HAVE THE SENSE OF THE 4TH. Thus *dásyá saṅyachchhate kámí* "the lover gives to the female slave."

पूर्ववत् सनः । १ । ३ । ६२ ।

सनः पूर्वो यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात् ।
एदिधिषते ।

No. 791.—Let an *átmanepada* affix come also AFTER a verb ending in the affix SAN (No. 752) in like manner AS it would come AFTER THAT verb itself WHICH STANDS BEFORE the affix *san*. Thus (as the verb *edh* "to increase,"—No. 543—takes the *átmanepada* affixes, so does it when *san* is added—giving) *edidhishate* "he wishes to increase,"

हलन्ताच्च । १ । २ । १० ।

इक्समीपाद्धलः परो झलादिः सन् कित् । निविविक्षते ।

No. 792.—AND AFTER WHAT ENDS IN A CONSONANT immediately preceded by an *ik*, the affix *san*, beginning with a *jhal* (i. e. not having the augment *iṭ*), shall be regarded as having an indicatory *k*. Thus *nivivikshate* "he will wish to enter."

गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः । १ । ३ । ३२ ।

गन्धनं सूचनम् । उत्कुरुते सूचयतीत्यर्थः । अवक्षेपणं भर्त्सनम् । श्येनो वर्तिकामुत्कुरुते । भर्त्सयतीत्यर्थः । हरिमुपकुरुते । सेवत इत्यर्थः । परदारान् प्रकुरुते तेषु सहसा प्रवर्तते । एधो दकस्योपस्कुरुते गुणमाधत्ते । कथाः प्रकुरुते । कथयतीत्यर्थः । शतं प्रकुरुते धर्मार्थं विनियुङ्क्ते । एषु किम् । कटं करोति । भुजो ऽनवने । ओदनं भुङ्क्ते । अनवने किम् । महीं भुनक्ति ।

No. 793.—Let the *átmanepada* affixes come AFTER the verb KṚI "to make," when it is used IN THESE SENSES, viz. "MANIFESTATION," "SARCASM," "SERVICE," "VIOLENCE," "CHANGE," "RECITATION," AND "ACTION TENDING TO EFFECT A DESIRED PURPOSE."

By "manifestation" is here meant "informing against,"—thus *utkurute* "he informs against." By "sarcasm" is meant "reviling,"—thus *śyeno vartikámutkurute* "the hawk reviles the quail." So, too, *harimupakurute* "he worships Hari:"—*paradárán prakurute* "he offers violence to another's wife:"—*edhodakasyopaskurute* "the wood gives a new quality to the water" (or "he pre-

pares the wood and the water for a sacrifice):"—*katháh prakurute* "he recites stories:"—*śatań prakurute* "he distributes a hundred (pieces of money, for the sake of merit)."

Why do we say "in these senses?" Witness *kaṭań karoti* "he makes a mat,"—(in which example an *átmanepada* affix is not employed.)

According to No. 718, the verb *bhuj* takes the *átmanepada* affixes, when it does not mean "to protect." Thus *odanań bhuṅkte* "he eats boiled rice." Why do we say "when it does not mean to "protect?" Witness *mahíń bhunakti* "he protects the earth."

So much for the application of the *átmanepada* affixes.

The employment of the *parasmaipada* affixes is next to be considered.

इत्यात्मनेपदप्रक्रिया ॥

। परस्मैपदम् ।

अनुपराभ्यां कृञः । १ । ३ । ७९ ।

कर्तृगे च फले गन्धनादौ च परस्मैपदं स्यात् । अनुकरोति । पराकरोति ।

No. 724.—Let the *parasmaipada* affixes come AFTER the verb KṚI "to make," coming AFTER ANU AND PARÁ even when the fruit of the action goes to the agent, and when the sense is that of "informing against, &c." (No. 793). Thus *anukaroti* "he imitates," *parákaroti* "he does well."

अभिप्रत्यतिभ्यः क्षिपः । १ । ३ । ८० ।

क्षिप प्रेरणे । स्वरितेत् । अभिक्षिपति ।

No. 795.—And AFTER the verb KSHIP, coming AFTER ABHI, PRATI, AND ATI. The verb *kship* means "to throw." The indicatory vowel of this root is circumflexly accented (No. 411—so that, but for this rule, we should have had both *padas* in the case of) *abhikshipati* "he throws on."

प्राद्वहः । १ । ३ । ८१ ।

प्रवहति ।

No. 796.—And AFTER the verb VAHA "to bear," coming AFTER PRA. Thus *pravahati* "it (the river) flows."

परेर्मृषः । १ । ३ । ८२ ।

परिमृषति ।

No 797.—And AFTER the verb MRISH "to bear," coming AFTER PARI. Thus *parimrishati* "he endures" or "he forgives."

व्याङ्परिभ्यो रमः । १ । ३ । ८३ ।

रमु क्रीडायाम् । विरमति ।

No. 798.—And AFTER the verb RAM, coming AFTER VI, ÁṄ, AND PARI. The verb *ram (ramu)* means "to sport." Thus *viramati* "he takes rest."

उपाच्च । १ । ३ । ८४ ।

यज्ञदत्तमुपरमति । उपरमयतीत्यर्थः । अन्तर्भावितण्यर्थोऽयम् ।

इति पदव्यवस्था ॥

No. 799.—AND AFTER UPA (the verb *ram* takes the *parasmaipada* affixes). Thus *yajnadattamuparamati* "he causes Yajñadatta to refrain." This is an instance of a verb involving in it the force of the affix *ṇi* (No. 747).

So much for the allotment of the *padas*.

The Impersonal and Passive forms have next to be considered.

। भावकर्मप्रक्रिया ।

भावकर्मणोः । १ । ३ । १३ ।

लस्यात्मनेपदम् ।

No. 800,—Let an *átmanepada* affix be the substitute of the affix *l* (No. 405), WHEN IT DENOTES THE ACTION of the verb OR THE OBJECT of the verb.

सार्वधातुके यक् । ३ । १ । ६७ ।

भावकर्मवाचिनि धातोर्यक् सार्वधातुके । भाव: क्रिया सा च भावार्थकलकारेणानूद्यते । युष्मदस्मद्भ्यां समानाधिकरण्याभावात् प्रथम: पुरुष: । तिङ्वाच्यक्रियाया अद्रव्यरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि किंत्वेकवचनमेवोत्सर्गत: । त्वया मयान्यैश्च भूयते । बभूवे ।

No. 801.—Let the affix YAK come after a root, WHEN A SÁRVADHÁTUKA affix FOLLOWS, denoting the action or the object. The "action" is the force of the verb itself; and this is again marked by the affix *l* (No. 405) when it has the sense of the action—i. e. when the verb is used impersonally). In this case there is (substituted for the *l*) an affix of the "lowest person," because the verb is not in agreement with either the pronoun "I" or "Thou."—Inasmuch as the action denoted by the tense-affix is not of the nature of a substance (to which the notions of duality or plurality might attach), since there is here no notion of duality, &c., neither an affix of the dual nor of the plural is to be employed, but hence necessarily only one of the singular.

Thus *twayá mayá anyaiśchа bhúyate* "it is become by thee, by me, and by others"—(i. e. "Thou becomest," "I become," and "others become,")—and, again, *babhúve* (No. 432) "it was become."

स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च । ६ । ४ । ६२ ।

उपदेशे योऽच् तदन्तानां हनादीनां च चिणीवाङ्गकार्यं वा स्यात् स्यादिषु भावकर्मणोर्गम्यमानयो: स्यादीनामिडागमश्च । चिण्वद्भावपक्षेऽयमिट् । चिण्वद्भावाद्वृद्धि: । भाविता । भविता । भाविष्यते । भविष्यते । भूयताम् । अभूयत । भाविषीष्ट । भविषीष्ट ।

No. 802.—WHEN SYA (No. 435), SICH (No. 472), SÍYUT (No. 555), OR TÁSI (No. 435) FOLLOWS IF THE ACTION OR THE OBJECT IS TO BE UNDERSTOOD by the affix (i. e. if the verb is impersonal or passive), then, on the inflective base OF verbs which IN their

ORIGINAL ENUNCIATION end in A VOWEL and on that OF the verbs *han*, &c.—viz. HAN "to kill," GRAH "to take," AND DṚIŚ "to see,"—THERE SHALL BE OPTIONALLY THE LIKE EFFECT AS IF the affix CHIṆ HAD FOLLOWED, AND IṬ shall be the augment of these affixes *sya*, &c. The augment *iṭ*, here mentioned, is to be applied on the alternative that the case is treated as if the affix *chiṇ* had followed—(not on the other alternative allowed by the rule). The substitution of *vṛiddhi* follows from the case's being treated as if *chiṇ* (with an indicatory *ṇ*—see No. 202—) had been attached. Thus we have *bhávitá* or *bhavitá* "it will be become by some one," *bhávishyate* or *bhavishyate* "it will be become," *bhú-yatám* "let it be become," *abhúyata* "it was become," *bhávishísh-ṭa* or *bhavishíshṭa* "may it be become."

चिण् भावकर्मणोः । ३ । १ । ६६ ।

च्लेश्चिण् स्याद्भावकर्मवाचिनि ते परे । अभावि । अभाविष्यत । अभविष्यत । अकर्मकोऽप्युपसर्गवशात् सकर्मकः । अनुभूयते आनन्दश्चैत्रेण त्वया मया च । अनुभूयेते । अनुभूयन्ते । त्वमनुभूयसे । अहमनुभूये । अन्वभावि । अन्वभाविषाताम् । अन्वभविषाताम् । णिलोपः । भाव्यते । भावयांचक्रे । भावयांबभूवे । भावयामासे । चिण्वदिट् । भाविता । आभीयत्वेनासिद्धत्वाण्णिलोपः । भावयिता । भावयिषीष्ट । अभावि । अभाविषाताम् । अभावयिषाताम् । बुभूष्यते । बुभूषांचक्रे । बुभूषिता । बुभूषिष्यते । बोभूय्यते । बोभूयिष्यते । अकृत्सार्वधातुकयोर्दीर्घः । स्तूयते विष्णुः । स्ताविता । स्तोता । स्ताविष्यते । स्तोष्यते । अस्तावि । अस्ताविषाताम् । अस्तोषाताम् । ऋ गतौ । गुणोऽर्तीति गुणः । अर्यते । स्मृ स्मरणे । स्मर्यते । सस्मरे । उपदेशग्रहणाच्चिण्वदिट् । आरिता । अर्ता । स्मारिता । स्मर्ता । अनिदितामिति नलोपः । स्रस्यते । इदितस्तु । नन्द्यते । संप्रसारणम् । इज्यते ।

No. 803.—Let CHIṆ be the substitute of *chli* (No. 471), WHEN *ta* (No. 407) follows, DENOTING THE ACTION OR THE OBJECT. Thus

*abhávi* "it was become by some one," *abhávishyata* (No. 802) or *abhávishyata* "it would be become."

Even a neuter verb (—a verb "without an object,"—) may, through the force of a preposition in combination with it, become active (—or "with an object)." For example—*anubhúyate ánandaśchaitreṇa twayá mayácha* "pleasure is experienced by Chaitra, by thee, and by me:"—and then again *anubhúyete* "the two are perceived," *anubhúyante* "they are perceived," *twamanubhúyase* "thou art perceived," *ahamanubhúye* "I am perceived," *anwabhávi* "it was perceived," *anwabhávishátám* or *anwabhavishátám* "the two were perceived." The affix *ṇi* (No. 747) being elided by No. 563, we have *bhávyate* "it is caused to be," *bhávayáñchakre* or *bhávayáñbabhúve* or *bhávayámáse* "it was caused to be." When (according to No. 802) the case is regarded as if the affix *chiṇ* had followed, then the augment *iṭ* is applied—giving *bhávitá* "it will be caused to be,"—the elision of *ṇi* (No. 563) still taking place, inasmuch as No. 802 in accordance with No. 599, is regarded by No. 563 as not having taken effect. On the other alternative allowed by No. 802, *bhávayitá* "it will be caused to be," *bhávayishíshṭa* "may it be caused to be," *abhávi* "it was caused to be," *abhávishátám* or *abhávayishátám* "the two were caused to be;" *bubhúshyate* "it is wished to be," *bubhúsháñchakre* "it was wished to be," *bubhúshitá* "will be wished to be," *bubhúshishyate* "it will be wished to be," *bobhúyyati* "it is repeatedly been," *bobhúyishyate* "it will be repeatedly been."

The vowel of the root (*shṭu* "to praise") being lengthened by No. 518, we have *stúyate vishṇuḥ* "Vishṇu is praised:"—*stávitá* (No. 802) or *stotá* "he will be praised," *stávishyate* or *stoshyate* "he will be praised," *astávi* "he was praised," *astávishátám* or *astoshátám* "the two were praised."

The verb *ṛi* "to go," substituting *guṇa* by No. 533, makes *aryate* "it is gone."

The verb *smṛi* "to remember" makes *smaryate* "it is remembered," *sasmare* "it was remembered."

These two verbs may be treated as if *chiṇ* followed, and may

take the augment *it*, because, in No. 802, the expression "in the original enunciation" is included, (and hence the fact that they end in a consonant at the time when the augment *it* presents itself, does not prevent their taking it). Thus *áritá* or *artá* it will be gone," *smáritá* or *smartá* "it will be remembered."

By No. 363, the nasal of the verb *srańs* "to fall," (which has not an indicatory *i*) being elided, we have *srasyate* "it is fallen:" —but of a verb which, like *nad (nadi)* "to be happy," has an indicatory *i*, the nasal is not elided, and we have *nandyate* "it is been happy (by so and so)—i. e. so and so is happy."

In the case of the verb *yaj* "to worship," the substitution of a vowel for the semi-vowel having taken place in accordance with No. 584, (the *yak* having an indicatory *k*) we have *ijyate* "it is worshipped (by so and so)—i. e. so and so worships."

तनोतेर्यकि । ६ । ४ । ४४ ।

आदन्तादेशो वा । तायते । तन्यते ।

No. 804.—WHEN the affix YAK (No. 801) comes AFTER the verb TAN "to extend," then long *á* is optionally the substitute for the final. Thus *táyate* or *tanyate* "it is extended."

तपोऽनुतापे च । ३ । १ । ६५ ।

तपश्च्लेश्चिण् न स्यात् कर्मकर्तर्यनुतापे च । अन्वतप्त पापेन ।
घुमास्थेतीत्वम् । दीयते । धीयते । ददे ।

No. 805.—Let not *chin* be the substitute of *chli* AFTER the verb TAP "to suffer," when the sense is reflective, AND WHEN THE SENSE IS THAT OF EXPERIENCING REMORSE. Thus *anwatapta pápena* "remorse was experienced by the sinner."

In the case of the verbs enumerated in No. 625, there is the substitution of long *I'*—so that we have *díyate* "it is given," *dhíyate* "it is held," *dade* "it was given."

आतो युक् चिण्कृतोः । ७ । ३ । ३३ ।

आदन्तानां युगागमश्चिणि ञ्णिति कृति च । दायिता । दाता ।
दायिषीष्ट । दासीष्ट । अदायि । अदायिषाताम् । भज्यते ।

No 806.—Let YUK be the augment OF what ends in LONG Á, WHEN CHIṆ FOLLOWS, OR when a KṚIT affix (No. 329), with an indicatory *ṅ* or *ṇ*. Thus (it being here optional, according to No. 802, to regard *chiṇ* as following) we have *dáyitá* or *dátá* "it will be given," *dáyishíshṭa* or *dásíshṭa* "may it be given," *adáyi* "it was given," *adáyishátám* "the two were given."

The verb *bhañj* "to break" makes *bhajyate* (No. 363) "it breaks."

भञ्जेश्च चिणि । ६ । ४ । ३३ ।

नलोपो वा । अभाजि । अभञ्जि । लभ्यते ।

No. 807.—AND OF the verb BHAÑJ "to break" the elision of the *n* (No. 363) is optional, WHEN CHIṆ FOLLOWS. Thus *abháji* or *abhañji* "it broke."

The verb *labh* "to gain" makes *labhyate* "it is gained."

विभाषा चिण्णमुलोः । ७ । १ । ६९ ।

लभेर्नुम् । अलम्भि । अलाभि ।

इति भावकर्मप्रक्रिया ॥

No. 808.—The verb *labh* "to gain" OPTIONALLY takes the augment *num*, WHEN CHIṆ AND ṆAMUL (No. 942) FOLLOW. Thus *alambhi* or *alábhi* "was gained."

So much on the subject of Impersonals and Passives (—or of the "action" and the "object").

The Reflective verb is next to be considered, where the object becomes the agent.

। कर्मकर्तृप्रक्रिया ।

यदा कर्मैव कर्तृत्वेन विवक्षितं तदा सकर्मकाणामप्यकर्मकत्वात् कर्तरि भावे च लकारः ।

No. 809.—When the object itself is wished to be spoken of as the agent, the affix *l*, even in the case of verbs that have an object (i. e. transitive verbs), stands for the agent or the action (and not for the object).

कर्मवत् कर्मणा तुल्यक्रियः । ३ । १ । ८७ ।

कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत् स्यात् कार्यातिदेशोऽयम् । तेन यगात्मनेपदचिण्चिण्वदिटः स्युः । पच्यते फलम् । भिद्यते काष्ठम् । अपाचि । अभेदि । भावे । भिद्यते काष्ठेन ।

इति कर्मकर्तृप्रक्रिया ॥

No. 810.—The (*l* denoting the) agent, when the action affecting the agent is SIMILAR TO THE ACTION WHICH AFFECTS THE OBJECT, is treated AS if it were (an *l*) denoting THE OBJECT.

This direction implies the substitution (for the operations incident to a tense-affix, or *l*, denoting an agent) of all the operations, (which fall to be performed when the tense-affix, or *l*, denotes the object). Hence there shall be the affixing of *yak* (No. 801), the employment of the *átmanepada* terminations (No. 800), the substitution of *chiṇ* for *chli* (No. 803), and the treatment of the word as directed in No. 802. Thus *pachyate phalam* "the fruit ripens of itself," *bhidyate káshṭham* "the wood splits of itself," *apáchi* (No. 803) "it ripened of itself," *abhedi* "it split of itself." As an example where the tense-affix denotes the action (i. e. where the verb is impersonal), take *bhidyate káshṭhena* "it is split (of itself) by the wood—i. e. the wood splits."

So much on the subject of Reflective verbs.

Some meanings of the Tenses, not previously specified, have next to be considered.

। लकारार्थः ।

अभिज्ञावचने लृट् । ३ । २ । ११२ ।

स्मृतिबोधिन्युपपदे भूतानद्यतने धातोर्लृट् । लङोऽपवादः । वस निवासे । स्मरसि कृष्ण गोकुले वत्स्यामः । एवं बुध्यसे चेतयसे इत्यादिप्रयोगेऽपि ।

No. 811.—WHEN a word IMPLYING "RECOLLECTION" is in connection with it, a verb takes the affix LṚIṬ (No. 440) with a past signification. This sets aside *laṅ* (No. 456). The verb *vas*

"to dwell" is thus employed in the following example :—*smarasi kṛishṇa gokule vatsyámah* "rememberest thou, Kṛishṇa, we were dwelling (literally—we will dwell—) at Gokula?" The construction is the same when we employ *budhyase* "dost thou know ?—*chetayase* "dost thou reflect ?"—and the like.

न यदि । ३ । २ । ११३ ।

यद्योगे उक्तं न । अभिजानासि यद्वने अभुञ्ज्महि ।

No. 812.—The aforesaid (No. 811) shall NOT apply IN connection with the particle YAT. Thus *abhijánási yad vane abhuñjmahi* "thou knowest how we did eat in the forest."

लट् स्मे । ३ । २ । ११८ ।

लिटोऽपवादः । यजति स्म युधिष्ठिरः ।

No. 813.—WHEN the particle SMA FOLLOWS let LAṬ (No. 406) be employed. This debars *liṭ* (No. 423). Thus *yajati sma yudhishṭhiraḥ* "Yudhishṭhira sacrificed."

वर्तमानसामीप्ये वर्तमानवद्वा । ३ । ३ । १३१ ।

वर्तमाने ये प्रत्यया उक्तास्ते वर्तमानसामीप्ये भूते भविष्यति च वा स्युः । कदागतोऽसि । अयमागच्छामि । आगमं वा । कदा गमिष्यसि । एष गच्छामि । गमिष्यामि वा ।

No. 814.—The affixes which are employed when the sense is that of PRESENT time may be OPTIONALLY IN LIKE MANNER employed, WHEN the sense is that of past or future time NOT REMOTE FROM THE PRESENT. Thus, to the question "when didst thou come?"—it may be replied either *ayam ágachchhámi* "I come now"—or *ágamam* "I have come now?"—and, to the question "when wilt thou go ?"—either *esha gachchhámi* or *gamishyámi* "I go, or I shall go, now."

हेतुहेतुमतोर्लिङ् । ३ । ३ । १५६ ।

वा स्यात् । कृष्णं नमेच्चेत् सुखं यायात् । कृष्णं नंस्यति चेत् सुखं यास्यति । भविष्यत्येवेष्यते । नेह । हन्तीति पलायते । विधिनिमन्त्रणेति लिङ् । विधिः प्रेरणम् । भृत्यादेर्निकृष्टस्य प्रवर्तनम् ।

यजेत । निमन्त्रणं नियोगकरणम् । आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम् । इह भुञ्जीत । आमन्त्रणं कामचारानुज्ञा । इहासीत । अधीष्टः सत्कारपूर्वको व्यापारः । पुत्रमध्यापयेद् भवान् । संप्रश्नः संप्रधारणम् । किं भो वेदमधीयीय उत तर्कम् । प्रार्थनं याञ्चा । भो भोजनं लभेय । एवं लोट् ।

इति लकारार्थप्रक्रिया ॥

इति तिङन्तप्रक्रिया समाप्ता ॥

No. 815.—WHEN CONDITION AND CONSEQUENT are spoken of, LIṄ (Nó. 459) may optionally be the affix. Thus "if he were to reverence *(namet)* Krishṇa, he would attain to *(yáyát)* felicity.' This does not apply to the following :—" he strikes—therefore the other flees"—for it is meant that this shall apply only to what is future. As stated in No. 459, *liṅ* implies "commanding, directing, &c." "Commanding" means "ordering"—one's stimulating to action some low person, such as a dependent—by saying, for example, *yajeta* "let him worship." "Directing" means enjoining a duty—the moving of a daughter's son, or the like, in regard to such a matter as the eating of the food prepared at an exequial rite—by saying, for example, *iha bhuñjíta* "let him eat in this place." "Inviting" implies an acquiescence in one's following his inclination—as when it is said (to some one inclined to sit down somewhere) *iha ásíta* "let your honour sit down here." "Expression of wish" here implies a respectful procedure —(as when one says respectfully to a teacher) *putram adhyápayed bhaván* "let your honour teach the boy." "Enquiring" here refers to the determining on the propriety or impropriety of anything—as *kiṅ bho! vedam adhíyíya uta tarkam* "how, then, I pray you—shall I peruse the Veda? or shall I study logic?" "Asking for" means begging—as *bho bhojanaṅ labheya* "O may I obtain (i. e. give me) food." In like manner is *loṭ* (No. 441) employed.

So much on the subject of the meanings of the tenses.

Thus is the discussion of "what ends with a tense-affix" concluded.

। कृदन्ताः ।

## OF WORDS ENDING IN THE AFFIXES CALLED *KṚIT*.

धातोः । ३ । १ । ९१ ।

आतृतीयान्तं ये प्रत्ययास्ते धातोः परे स्युः । कृदतिङिति कृत्संज्ञा ।

No. 816.—As far as the end of the 3rd Lecture [reckoning from the present aphorism], the affixes treated of are to be [understood as coming] AFTER some VERBAL ROOT. According to No. 329, the name of these affixes is *kṛit.*

वासरूपोऽस्त्रियाम् । ३ । १ । ९४ ।

अस्मिन् धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य बाधको वा स्यात् स्त्र्यधिकारोक्तं विना ।

No. 817.—In this division of the grammar, where "after some verbal root" [see No. 816] is understood in every case, let an affix which is [calculated] to debar a general one, NOT BEING OF THE SAME FORM, OPTIONALLY debar it—BUT NOT IN those cases which fall under the influence of No. 918 [for, in those cases, the supersession is compulsory].

कृत्याः । ३ । १ । ९५ ।

ण्वुल्तृचावित्यतः प्राक् कृत्यसंज्ञाः स्युः ।

No. 818.—Let the affixes treated of as far as the aphorism at No. 835 [reckoning from the present one] be called KṚITYA.

कर्तरि कृत् । ३ । ४ । ६७ ।

इति प्राप्ते ।

No. 819.—A KṚIT affix HAS THE SENSE OF AN AGENT. This rule having presented itself [the following one modifies it].

तयोरेव कृत्यक्तखलर्थाः । ३ । ४ । ७० ।

एते भावकर्मणोरेव स्युः ।

No. 820.—The affixes called KṚITYA (No. 818), and the affix KTA (No. 866), AND THOSE THAT HAVE THE SENSE OF KHAL (No. 933), may HAVE ONLY THOSE TWO senses, viz.—act and object.

**तव्यत्तव्यानीयरः । ३ । १ । ९६ ।**

धातोरेते स्युः । एधितव्यम् एधनीयं त्वया । भावे औत्सर्गिक-मेकवचनं क्लीबत्वं च । चेतव्यश्चयनीयो वा धर्मस्त्वया ।

No. 821.—Let these—viz. TAVYAT, TAVYA, AND ANÍYAR, come after some verbal root. Thus *edhitavyam* (Nos. 436 and 433) or *edhániyaṅ twayá* "thou must increase." Here the sense being that of the action itself [which is but one, and neither male nor female], there is, from the nature of the case, a singular affix, and the neuter gender is employed. [The case is otherwise with the example following—viz.] *chetavyah* or *chayaníyo dharmas-twayá* "thou must gather merit."

केलिमर उपसंख्यानम् । पचेलिमा माषाः । पक्तव्या इत्यर्थः । भिदेलिमाः सरलाः । भेत्तव्याः । कर्मणि प्रत्ययः ।

No. 822.—"The affix KELIMAR SHOULD BE ENUMERATED in ADDITION [to those enumerated in No. 821"]. Thus *pachelimá másháh* —that is to say, "kidney beans are to be cooked":—*bhidelimáh saraláh* "pines are to be split." This affix denotes the *object* [alone —and cannot be employed, like those enumerated in No. 821, to denote also the *action*].

**कृत्यल्युटो बहुलम् । ३ । ३ । ११३ ।**

क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः
क्वचिद्विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य
चातुर्विधं बाहुलकं वदन्ति । १ ।

स्नात्यनेनेति स्नानीयं चूर्णम् । दीयतेऽस्मै दानीयो विप्रः ।

No. 823.—The affixes called KṚITYA (No. 818) AND the affix LYUṬ are DIVERSELY applicable. [That is to say] sometime they are applied [where there was no express rule for their application]; sometimes they are not applied [in spite of an express rule for their application]; sometimes they are optionally employed or not; and somtimes there is some other result [licence permitted by the rule].

[According to the following verse from the grammar called the *Sáraswata*], "Seeing that the application of certain rules is various, they specify four kinds of varieties," [viz. the four above-mentioned, —among which the last of the four includes all the cases not included in the other three]. For example—*snáníyań chúrṇam* "powder for bathing," *dáníyo viprah* "a Bráhman to whom a donation is to be made." [In the first of these examples the "powder" is the "instrument" (expressible by the 3rd case); and in the second the Bráhman is the "recipient" (expressible by the 4th case);—so the in both cases the affix is applied without any express rule—the express rule for its application (No. 821) having reference only to "act" and "object" (No. 823)].

अचो यत् । ३ । १ । ९७ ।

चेयम् ।

No. 824.—The affix YAT comes AFTER [a root that end in] A VOWEL. Thus *cheya* "what is to be gathered."

ईद्यति । ६ । ४ । ६५ ।

यति परे आत ईत् स्यात् । देयम् । ग्लेयम् ।

No. 825.—Let LONG í be the substitute of long *á* WHEN the affix YAT (No. 824) FOLLOWS. Thus (*guṇa* being substituted by No. 420) we have *deya* "what is to be given," *gleya* "to be exhausted."

पोरदुपधात् । ३ । १ । ९८ ।

पवर्गान्ताददुपधाद्यत् । ण्यतोऽपवादः । शप्यम् । लभ्यम् ।

No. 826.—Let the affix *yat* come AFTER a root which ends in A PALATAL PRECEDED BY SHORT A. This debars the affix *ṇyat* (No 831), so that we have *śapya* "to be sworn," *labhya* "to be acquired."

एतिस्तुशास्वृदृजुषः क्यप् । ३ । १ । १०९ ।

एभ्यः क्यप् ।

No. 827.—The affix KYAP may come AFTER these roots—viz. I "to go," SHṬU "to praise," SÁS "to govern," VṚI "to choose," DṚI "to respect," and JUSH "to please."

ह्रस्वस्य पिति कृति तुक् । ६ । १ । ७१ ।

इत्यः । स्तुत्यः । शासु अनुशिष्टौ ।

No. 828.—Let TUK be the augment OF A SHORT vowel, WHEN A KṚIT affix, WITH AN INDICATORY P, FOLLOWS. Thus *itya* "to be gone"—from the root I "to go"], *stutya* "to be praised."

The verb *śás* means "to govern."

शास इदङ्हलोः । ६ । ४ । ३४ ।

शास उपधाया इत् स्यादङि हलादौ क्ङिति च । शिष्यः । वृत्यः । आदृत्यः । जुष्यः ।

No. 829.—Let SHORT I be the substitute OF the penult of the root ŚÁS "to instruct," WHEN the affix AṄ (No. 634) FOLLOWS, OR what affix begins with A CONSONANT and has an indicatory *k* or *ṅ*. Thus [from the roots mentioned in No. 827] we may have *śishya* "to be instructed," *vṛitya* "to be chosen," *ádṛitya* "to be honoured," *jushya* "to be served."

मृजेर्विभाषा । ३ । १ । ११३ ।

मृजेः क्यब्वा । मृज्यः ।

No. 830.—Let the affix *kyap* OPTIONALLY come AFTER the root MṚIJ "to cleanse." Thus *mṛijya* "to be cleansed."

ऋहलोर्ण्यत् । ३ । १ । १२४ ।

ऋवर्णान्ताद्धलन्ताच्च ण्यत् । कार्यम् । हार्यम् । धार्यम् ।

No. 831.—Let the affix ṆYAT come AFTER what ends in ṚI or *ṛí* or in A CONSONANT. Thus *kárya* "to be made," *hárya* "to be taken," *dhárya* "to be held."

चजोः कु घिण्ण्यतोः । ७ । ३ । ५२ ।

चजोः कुत्वं स्याद्घिति ण्यति च ।

No. 832.—Let there be substitution of A GUTTURAL in the room OF CH AND of J, WHEN an affix with an indicatory GH follows, AND WHEN the affix ṆYAT (No. 831) FOLLOWS.

मृजेर्वृद्धिः । ७ । २ । ११४ ।

मृजेर्वृद्धिः सार्वधातुकार्धधातुकयोः । मार्ग्यः ।

No. 833.—Let VṚIDDHI be the substitute OF the *ik* (No. 1) of MṚIJ "to cleanse," when a *sárvadhátuka* or an *árdhadhátuka* affix follows :—(No. 420). Thus (on the option allowed by No. 830) *márgya* (No. 832) "to be cleansed."

भोज्यं भक्ष्ये । ७ । ३ । ६९ ।

भोग्यमन्यत् ।

इति कृत्यप्रक्रिया ॥

No 834.—The verb *bhuj* makes BHOJYA, WHEN THE SENSE IS "TO BE EATEN," but BHOGYA otherwise—[as when the sense is "to be enjoyed"].

So much for the management of the *prakriya* affixes.

ण्वुल्तृचौ । ३ । १ । १३३ ।

धातोरेतौ स्तः । कर्तरि कृदिति कर्त्रर्थे ।

No. 835.—These two affixes, ṆWUL AND TṚICH, are placed after verbal roots. According to No. 819, they have the sense of of an "agent."

युवोरनाकौ । ७ । १ । १ ।

यु वु एतयोरनाकौ स्तः । कारकः । कर्ता ।

No. 836.—In the room OF YU AND VU, there are ANA AND AKA. Thus (*ṇwul* having been added to the root *kṛi* "to make," by No. 835; and the *ṇ* and *l* having been elided by Nos. 148, 5, and 7; and *vṛiddhi* being substituted according to Nos. 863 and 202, we have) *káraka*, and (with *tṛich*—No. 835—) *kartṛi* "a maker."

नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः । ३ । १ । १३४ ।

नन्द्यादेर्ल्युर्ग्रह्यादेर्णिनिः पचादेरच् । नन्दयतीति नन्दनः । जनार्दनः । लवणः । ग्राही । स्थायी । मन्त्री । पचादिराकृतिगणोऽयम् ।

No. 837.—AFTER the verbs NAD (*nadi*) "to be happy," &c., there is the LYU; AFTER the verbs GRAH "to take," &c., there is ṆINI; AND AFTER the verbs PACH "to cook," &c., there is ACH.

Thus *nand+lyu* [Nos. 497, 155, and 836,] *nandana* "one who delights," *janárdana* [from *jana* "mankind" and *ardana* derived in like manner from *ard* "to pain"] "Vishṇu—the subduer of mankind," *lavaṇa* "salt" [from *lú* "to cut"—where the substitution of a cerebral *ṇ* is an irregularity]. Then again *grah+ṇini* (No. 36)=*gráhin* "who takes," *stháyin* (No. 806) "who stays," and *mantṛin* "who advises." The class of verbs "*pach*, &c." is one not defined by rule—[compare No. 53].

**इगुपधज्ञाप्रीकिरः कः । ३ । १ । १३५ ।**

**एभ्यः कः । बुधः । कृशः । ज्ञः । प्रियः । किरः ।**

No. 838.—There is the affix KA AFTER THOSE verbs WHICH HAVE AN IK AS their PENULT, AND after JŃÁ "to know," PRÍ "to please," AND KṚÍ "to throw." Thus *budha* (No. 155) "who knows," *kṛiśa* "who is thin," *jña* (No. 524) "who knows," *priya* "what please," *kira* (No. 706) "who throws."

**आतश्चोपसर्गे । ३ । १ । १३६ ।**

**प्रज्ञः । सुग्लः ।**

No. 839.—AND [*ka*—No. 838—shall come—] AFTER a verb ending in LONG Á, WHEN THERE IS AN UPASARGA (No. 47). Thus *prajña* "very wise," *sugla* "very weary"—[*á* having been substituted for the *ai* of *glai* by No. 528].

**गेहे कः । ३ । १ । १४४ ।**

**गेहे कर्तरि ग्रहेः कः स्यात् । गृहम् ।**

No. 840.—Let the affix KA come after the verb *grah* "to take." WHEN the agent so expressed denotes A HOUSE. Thus *griha* (No. 675) "a house."

**कर्मण्यण् । ३ । २ । १ ।**

**कर्मण्युपपदे धातोरण् । कुम्भं करोति कुम्भकारः ।**

No. 841.—The affix AN comes after a verbal root, WHEN THE OBJECT is in composition with it. Thus *kumbha-kára* "one who makes pots"—i. e. "a potter."

आतोऽनुपसर्गे कः । ३ । २ । ३ ।

अणोऽपवादः । गोदः । धनदः । कम्बलदः । अनुपसर्गे किम् । गोसंप्रदायः ।

No. 842.—The affix KA comes AFTER a verb that ends in LONG Á, WHEN there is NO UPASARGA (No. 47). The debars the *aṇ* (No. 841)—and we have *goda* "who gives a cow," *dhanada* "who gives wealth," and *kambalada* "who gives a blanket." Why "when there is no *upasarga?*" Witness *gosaṁpradáya* (No. 806) "who ceremoniously gives a cow."

मूलविभुजादिभ्यः कः । मूलानि विभुजति मूलविभुजो रथः । आकृतिगणोऽयम् । महीध्रः । कुध्रः ।

No. 843.—The affix KA comes AFTER MÚLAVIBHUJ, &C. Thus *múlavibhuja* "a car (which cuts the roots—*e. g.*, of the grass, &c. in its course)." This is a class of words [not enumerated under any rule, but] to be recognised by the form [see No. 53]. Thus *mahídhra* or *kudhra* "a mountain"—"what holds the earth"—(from *dhṛi* "to hold").

चरेष्टः । ३ । २ । १६ ।

अधिकरणे उपपदे । कुरुचरः ।

No. 844.—OF the verb CHAR "to go," the affix is ṬA, when a word in composition with it is in the locative case. Thus *kuru-chara* "who goes among the Kurus."

भिक्षासेनादायेषु च । ३ । २ । १७ ।

भिक्षाचरः । सेनाचरः । आदायेति ल्यबन्तम् । आदायचरः ।

No. 845.—AND WHEN the word in composition with it is BHIKSHÁ "alms," SENÁ "an army," AND ÁDÁYA "having taken," (then *ṭa* is the affix after *char* "to go"). Thus *bhiksháchara* "a beggar"—"who goes for alms,"—*senáchara* "one who goes with the army." The word *ádáya* ends in *lyap* (No. 941):—from it we may have *ádáyachara* "who goes after having taken."

कृञो हेतुताच्छील्यानुलोम्येषु । ३ । २ । २० ।

एषु द्योत्येषु करोतेष्टः ।

No. 846.—The affix *ṭa* comes after the verb KṚI "to make," WHEN these senses are to be indicated—viz. CAUSE, HABIT, AND GOING WITH THE GRAIN.

**अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य । ८ । ३ । ४६ ।**

अदुत्तरस्यानव्ययस्य विसर्गस्य समासे नित्यं सादेशः करोत्यादिषु परेषु । यशस्करी विद्या । श्राद्धकरः । वचनकरः ।

No. 847.—In a compound (No. 961), let *s* always be the substitute of *visarga* coming AFTER A, and NOT being part OF AN INDECLINABLE word (No. 399), WHEN KṚI "to make" FOLLOWS, OR KAMI "to desire," OR KAṄSA "a goblet," OR KUMBHA "a jar," OR PÁTRA "a vessel," OR KUŚÁ "a counter (in the shape of a piece of stick, used at sacrifices to keep count of the prayers)," OR KARṆÍ "the ear." Thus (as examples of the three cases under No. 846) *yaśaskarí vidyá* "honourable science," *śráddhakara* "who performs obsequies," *vachanakara* "who does what he is bid."

**एजेः खश् । ३ । २ । २८ ।**

ण्यन्तादेजेः खश् ।

No. 848.—The affix KHAŚ comes AFTER the verb EJ "to tremble," when it ends in *ṇi* (No. 747).

**अरुर्द्विषदजन्तस्य मुम् । ६ । ३ । ६७ ।**

अरुषो द्विषतोऽजन्तस्य च मुमागमः खिदन्ते परे न त्वव्ययस्य । शित्वाच्छबादिः । जनमेजयतीति जनमेजयः ।

No. 849.—When that which ends with an affix having an indicatory *kh* follows, let MUM be the augment OF the words ARUS "a vital part," DWISHAT "an enemy," AND WHAT ENDS WITH A VOWEL, provided it be not an indeclinable. Since the affix *khaś* (No. 848) has an indicatory *ś* (No. 418), the affixes *śap* (No. 419) &c. are here applicable. *Janamejaya* "who awes mankind"—[the name of a prince].

प्रियवशे वदः खच् । ३ । २ । ३८ ।

प्रियंवदः । वशंवदः ।

No. 850.—The affix KHACH comes AFTER the verb VAD "to speak," WHEN PRIYA OR VAŚA is the word in composition with it. Thus *priyañvada* (No. 849) "who speaks kindly," *vaśañvada* "who professes submission."

आत्ममाने खश्च । ३ । २ । ८३ ।

स्वकर्मके मनने वर्तमानान्मन्यतेः सुपि खश् स्यात् । चाण्णिनिः । पण्डितमात्मानं मन्यते पण्डितंमन्यः । पण्डितमानी ।

No. 851.—AND let KHAŚ come after the verb *man* "to think," when the word in composition with it is a word with a case-affix, and WHEN it is EMPLOYED TO SIGNIFY THOUGHT WHEREOF THE OBJECT is SELF. By the "and" it is meant that the affix *ṇini* (No. 856) may be employed in the same sense. Thus *paṇḍitañmanya* or *paṇḍitamání* "who thinks himself learned."

अन्येभ्योऽपि दृश्यन्ते । ३ । २ । ७५ ।

मनिन् क्वनिप् वनिप् विच् एते प्रत्यया धातोः स्युः ।

No. 852.—These affixes—viz. *manin, kwanip, vanip,* and *vich* ARE SEEN AFTER OTHER verbs ALSO [besides those ending in *a*:,—see Páṇini III. 2. 74].

नेड्वशि कृति । ७ । २ । ८ ।

वशादेः कृत इण्न । शॄ हिंसायाम् । सुशर्मा । प्रातरित्वा ।

No. 853.—The augment IṬ (No. 433) is NOT that of a *kṛit* affix, WHEN IT BEGINS WITH A VAŚ. The verb *śṛí* means "to injure." [Adding to this the affix *manin*—No. 852—we have] *suśarman* "who destroys well" [e. g. destroys sin or ignorance] [From the verb *i* "to go," by adding *kwanip,* we have] *prátaritwan* (No. 828) "who goes early."

विड्वनोरनुनासिकस्यात् । ६ । ४ । ४१ ।

अनुनासिकस्यात् स्यात् । विजायत इति विजावा । ओणृ अपनयने । अवावा । विच् । रुष रिष हिंसायाम् । रोट् । रेट् । सुगण् ।

No. 854.—When the affixes vit (III. 2. 67) and van (No. 852) follow, let long á be substituted in the room of a nasal. Thus (from the verb *jan* "to bring forth," *vijávan* "who brings forth," and so, from the verb *on (oṇṛi)* "to send away," *avávan* "who removes" (i. e. removes sin, &c.). The affix *vich* (No. 852), with the verbs *rush* and *rish* "to injure," (*guṇa* being substituted by No. 485—and the *v* elided by 330,) gives *rosh* and *resh* "who injures." In the same way, from *gaṇ* "to reckon," *sugaṇ* "who reckons well."

क्विप् च । ३ । २ । ७६ ।

अयमपि दृश्यते । उखास्रत् । पर्णध्वत् । वाहभ्रट् ।

No. 855.—And this also—viz. kwip—is seen [after a verb—see No. 816]. Thus [the whole affix disappearing through Nos. 155, 36, and 330,] we have *ukhásrat* (Nos. 363 and 287) "falling from the pot," *parṇadhwat* "falling from the leaves," *váhabhraṭ* "falling from a car."

सुप्यजातौ णिनिस्ताच्छील्ये । ३ । २ । ७८ ।

अजात्यर्थे सुपि धातोर्णिनिस्ताच्छील्ये द्योत्ये । उष्णभोजी ।

No. 856.—When habit is to be expressed, the affix ṇini comes after a verb, provided the word with a case affix in composition with it does not mean a genus. Thus *ushṇabhojin* "who eats his meal hot."

मनः । ३ । २ । ८२ ।

सुपि मन्यतेर्णिनिः स्यात् । दर्शनीयमानी ।

No. 857.—Let the affix *ṇini* come after the verb man "to think," when there is a word with a case-affix in composition with it. Thus *darśaníyamánin* "who thinks himself handsome."

खित्यनव्ययस्य । ६ । ३ । ६६ ।

पूर्वपदस्य ह्रस्वः । कालिंमन्या ।

No. 858.—When an affix with an indicatory kh follows, (the short vowel, by VI. 3. 61, is the substitute of the word in composition with the verb) provided it is not an indeclin-

ABLE. Thus *kálinmanyá* (No. 849) "who fancies herself the goddess Kálí."

**करणे यजः । ३ । २ । ८५ ।**

करणे उपपदे भूतार्थयजेर्णिनिः कर्तरि । सोमेनेष्टवान् सोमयाजी । अग्निष्टोमयाजी ।

No. 859.—The affix *nini* in the sense of *agent* comes AFTER the verb YAJ "to sacrifice" with the sense of past time, WHEN the word in composition is IN THE INSTRUMENTAL CASE. Thus *somayájin* "who has sacrificed with the Soma juice," *agnishṭomayájin* "who has sacrificed with a five days' series of offerings."

**दृशेः क्वनिप् । ३ । २ । ९४ ।**

कर्मणि भूते । पारं दृष्टवान् । पारदृश्वा ।

No. 860.—The affix KWANIP, in the sense of *object*, comes AFTER the verb DṚIŚ "to see," with a past signification. Thus *páradṛiśwan* "who has seen across."

**राजनि युधिकृञः । ३ । २ । ९५ ।**

क्वनिप् । युधिरन्तर्भावितण्यर्थः । राजानं योधितवान् राजयुध्वा । राजकृत्वा ।

No. 861.—The affix *kwanip* comes AFTER the verbs YUDH "to fight," AND KṚI "to make," WHEN the word in composition is RÁJAN "a king." Thus *rájayudhwan* (No. 200) "who has caused the king to fight," *rájakṛitwan* (No. 828) "who has made a king."

**सहे च । ३ । २ । ९६ ।**

सह योधितवान् सहयुध्वा । सहकृत्वा ।

No. 1082.—AND there is elision OF these two, YAṄ (No. 1081) AND AṄ (No. 1075), being parts of what, ending with *yaṅ* or *aṅ* has the sense of a descendant not nearer than a grandson (No. 1079), when the word [of itself, and not as part of a compound epithet dependent on another word] takes the plural,—but not in the feminine. Thus *gargáh* "the male descendants of Garga," *vatsáh* "the male descendants of Vatsa."

जीवति तु वंश्ये युवा । ४ । १ । १६३ ।

वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञमेव स्यात् ।

1083.—But when one in a line of descent, beginning with a father (and reckoning upwards), is alive, let the descendant of a grandson or still lower descendant, beginning (therefore) with the fourth (in the order of descent) be called YUVAN [—and not *gotra* No. 1079].

गोत्राद्यून्यस्त्रियाम् । ४ । १ । ९४ ।

यून्यपत्ये गोत्रप्रत्ययान्तादेव प्रत्ययः स्यात् स्त्रियां तु न युवसंज्ञा ।

No. 1084.—When a descendant of the description denoted by YUVAN (No. 1083) is spoken of, let the affix be attached only AFTER what already ends with an affix marking a DESCENDANT AS LOW AT LEAST AS A GRANDSON:—but, IN THE FEMININE, the word is NOT termed *yuvan*, [nor treated accordingly].

यञिञोश्च । ४ । १ । १०१ ।

गोत्रे यौ यञिञौ तदन्तात् फक् ।

No. 1085.—AND let *phak* come AFTER what ends with YAÑ AND IÑ, signifying a descendant (No. 1075) at least as low as a grandson, [when a further descendant of the description mentioned in No. 1083, is to be denoted].

आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् । ७ । १ । २ ।

प्रत्ययादेः फस्य आयन् ढस्येय् खस्य ईन् छस्य ईय् घस्य इय् एते स्युः । गर्गस्य युवापत्यं गार्ग्यायणः । दाक्षायणः ।

No. 1086.—Let there be ÁYAN in the room OF PHA, EY in the room OF ḌHA, ÍN in the room OF KHA, ÍY in the room OF CHHA, AND IY in the room OF GHA, being INITIALS OF AFFIXES. Thus *gárgyáyaṇa* (No. 1085) "a distant descendant of Garga," *dák-*

*sháyana* "a distant descendant of Daksha"—[Garga and Daksha being alive, or some one intermediate between them and the descendants so named being alive].

अत इञ् । ४ । १ । ९५ ।

अपत्येऽर्थे । दाक्षिः ।

No. 1087.—Let IN, in the sense of a descendant, come AFTER what ends in SHORT A. Thus *dákshi* (No. 260) "a descendant of Daksha."

बाह्वादिभ्यश्च । ४ । १ । ९६ ।

बाहविः । औडुलोमिः । आकृतिगणोऽयम् ।

No. 1088.—AND AFTER BÁHU, &c. [let *in*, No. 1087, come]. Thus *báhavi* (No. 1078) "a descendant of Báhu," *audulomi* "a descendant of Uduloman."

This is a class of words recognizable only by the form—(see No. 53).

अनृष्यानन्तर्ये बिदादिभ्योऽञ् । ४ । १ । १०४ ।

ये त्वत्रानृषयस्तेभ्योऽपत्येऽन्यत्र तु गोत्रे । बिदस्य गोत्रं बैदः । बैदौ । बिदाः । पुत्रस्यापत्यं पौत्रः । पौत्रौ । पौत्राः । एवं दौहित्रादयः ।

No. 1089.—Let there be the affix AN AFTER VIDA, &C., IN THE SENSE OF IMMEDIATE DESCENDANT (or son) AFTER those which are NOT names of sanctified SAGES, but otherwise in the sense of a descendant not nearer than a grandson (No. 1079). Thus *vaida* "the descendant (not nearer than a grandson) of (the sanctified sage) Vida," which in the dual becomes *vaidau*, and in the plural *vidáh* (No. 1082); then again *pautra* "a son's son (i. e. a grandson)"—dual *pautrau*, plural *pautráh*—(No. 1082 not applying to this, because the derivation is not of the kind called *gotra*—No. 1079). In the same way *dauhitra* (No. 1069) "a daughter's son," and the like.

शिवादिभ्योऽण् । ४ । १ । ११२ ।

अपत्ये । शैवः । गाङ्गः ।

No. 1090.—Let the affix AṆ come AFTER ŚIVA, &c., in the sense of offspring. Thus *śaiva* "a descendant of Śiva," *gáṅga* "a descendant of Gaṅgá."

ऋष्यन्धकवृष्णिकुरुभ्यश्च । ४ । १ । ११४ ।

ऋषिभ्यः । वासिष्ठः । वैश्वामित्रः । अन्धकेभ्यः । श्वाफल्कः । वृष्णिभ्यः । वासुदेवः । कुरुभ्यः । नाकुलः । साहदेवः ।

No. 1091.—AND (the affix *aṇ* may come) AFTER names of sanctified SAGES, AND of persons belonging to the ANDHAKA, VṚISHṆI, AND KURU race. It comes after the names of sages in the examples *vásishṭha* "a descendant of (the sage) *Vasishṭha*," and *vaiśwámitra* "a descendant of Viśwámitra," after the *Andhakas* in *śwáphalka* "a descendant of Śwaphalka, after the *Vṛishṇis* in *vásudeva* "the son of Vasudeva," and after the *Kurus* in *nákula* "a descendant of Nakula," and *sáhadeva* "a descendant of Sahadeva."

मातुरुत् संख्यासंभद्रपूर्वायाः । ४ । १ । ११५ ।

संख्यादिपूर्वस्य मातृशब्दस्य उदादेशः स्यादण् प्रत्ययश्च । द्वैमातुरः । षाण्मातुरः । सांमातुरः । भाद्रमातुरः ।

No. 1092.—Let U be the substitute OF the word MÁTṚI "a mother" PRECEDED BY A NUMERAL, OR by SAM, OR BHADRA; and let there be the affix *aṇ*. Thus *dwaimátura* (No. 37) "having a mother and a step-mother"—(meaning Gaṇeśa), *sháṇmátura* "having six mothers"—(meaning Kártikeya who was brought up by the six Krittikás), *sáṁmátura* "whose mother is good," *bhádramátura* "having an illustrious mother."

स्त्रीभ्यो ढक् । ४ । १ । १२० ।

स्त्रीप्रत्ययान्तेभ्यो ढक् । वैनतेयः ।

No. 1093.—AFTER words ending with FEMININE affixes (No. 1341), let there be the affix ḌHAK (No. 1086). Thus *vainateya*, "the son of Vinatá"—(meaning Garuḍa).

कन्यायाः कनीन च । ४ । १ । ११६ ।

चादण् । कानीनो व्यासः कर्णश्च ।

No. 1094.—AND let KANÍNA be the substitute OF KANYÁ. By the "and" the affixing of *aṇ* is indicated. Thus *kánína* "the son of an unmarried woman"—e. g. Vyása or Karṇa.

राजश्वशुराद्यत् । ४ । १ । १३७ ।

No. 1095.—AFTER RÁJAN AND SWAŚURA, let there be the affix YAT.

राज्ञो जातावेव ।

No. 1096.—"AFTER RÁJAN, ONLY WHEN IT MEANS THE regal CASTE," (does the affix directed by No. 1095 come).

ये चाभावकर्मणोः । ६ । ४ । १६८ ।

यादौ तद्धितेऽन् प्रकृत्या स्यान्न तु भावकर्मणोः । राजन्यः । जातावेवेति किम् ।

No. 1097.—AND WHEN a *taddhita* affix, beginning with Y, follows, let AN (if the word ends in *an*) remain in its shape unaltered, but NOT WHEN THE SENSE IS THAT OF ACTION OR STATE. Thus *rájanya* (Nos. 1095 and 1096) "a Kshatriya or man of the regal caste"——(whereas "the royal state of a king," by No. 979, would be *rájya*). Why do we say, in No. 1096, "only when it means the regal caste?" [For the reply see the example under the next rule].

अन् । ६ । ४ । १६७ ।

अन् प्रकृत्याण्णि परे । राजनः । श्वशुर्यः ।

No. 1098.—Let AN (at the end of a word) remain in its original form (in spite of No. 979), when the affix *aṇ* follows. Thus *rájana* "the son of a king" (who need not have had a Kshatriya mother, in which case he will not be of the Kshatriya race—see No. 1097). Then, again, by, No. 1095, we have *śwaśurya* "the son of a father-in-law."

क्षत्राद्घः । ४ । १ । १३८ ।

क्षत्रियः । जातावित्येव । क्षात्रिरन्यः ।

No. 1099.—AFTER KSHATRA, let there be the affix GHA. Thus *kshatriya* (Nos. 1086 and 260) "one of the caste of the Kshatras." This is the form of the derivative only when the caste is spoken of—for otherwise the derivative is *kshátri* (No. 1087) "a descendant of a Kshatra" (not necessarily by a Kshatra mother).

रेवत्यादिभ्यष्ठक् । ४ । १ । १४६ ।

No. 1100.—AFTER REVATÍ, &c., let there be ṬHAK.

ठस्येकः । ७ । ३ । ५० ।

अङ्गात् परस्य ठस्येकादेशः । रैवतिकः ।

No. 1101.—Let IKA be the substitute OF ṬHA coming (without the intervention of any letter) after an inflective base (No. 152). Thus *raivatika* "a descendant of Revatí."

जनपदशब्दात् क्षत्रियादञ् । ४ । १ । १६८ ।

जनपदक्षत्रियवाचकाच्छब्दादञपत्ये । पाञ्चालः ।

No. 1102.—Let there be AÑ, to denote progeny, AFTER A WORD WHICH, while it EXPRESSES A COUNTRY, expresses ALSO A KSHATRIYA. Thus *páñchála* "the descendant of the Kshatriya who gave his name to the country of Pañchála."

क्षत्रियसमानशब्दाज्जनपदात् तस्य राजन्यपत्यवत् । पञ्चालानां राजा पाञ्चालः ।

No. 1103.—"(Let the same affix—see No. 1102—) AS WHEN the sense is that of PROGENY, WHEN the sense is that of the KINGS THEREOF, come AFTER the name of A COUNTRY OF THE SAME NAME AS A KSHATRIYA." Thus *páñchála* "the king of the Kshatriyas (or of the country) of Pañchála."

पुरोरण् । पौरवः ।

No. 1104.—"Let AṆ come AFTER PURU." Thus *paurava* "a descendant of Puru."

पाण्डोर्ड्यण् । पाण्ड्यः ।

No. 1105.—"Let DYAṆ come AFTER PÁṆḌU." Thus *páṇḍya* "a descendant of Páṇḍu."

कुरुनादिभ्यो ण्यः । ४ । १ । १७२ ।

कौरव्यः । नैषध्यः ।

No 1106.—Let there be ṆYA AFTER KURU AND names BEGINNING WITH N (signifying both a country and its Kshatriya inhabitants). Thus *kauravya* (No. 1078) "a descendant of Kuru," *naishadhya* "a descendant of Nishadha."

ते तद्राजाः । ४ । १ । १७४ ।

अञादयस्तद्राजसंज्ञाः स्युः ।

No. 1107.—Let THESE, viz. the affixes *aṅ*, &c., be called TADRÁJA (No. 1027—i. e. "the king thereof").

तद्राजस्य बहुषु तेनैवास्त्रियाम् । २ । ४ । ६२ ।

बहुष्वर्थेषु तद्राजस्य लुक् तत्कृते बहुत्वे न तु स्त्रियाम् ।

पञ्चालाः । इत्यादि ।

No. 1108.—There shall be elision OF a TADRÁJA (No. 1107) affix, WHEN the meanings are MANY (i. e. when the word is plural) WHEN BY THE WORD ITSELF [and not by the word standing as part of a compound epithet dependent on another word] the plural is taken—but NOT IN THE FEMININE. Thus (as the plural of *páñchála* —No. 1103 we have) *pañcháláh* "the kings of Pañchála, or their descendants." And so of others.

कम्बोजाल्लुक् । ४ । १ । १७५ ।

अस्मात् तद्राजस्य लुक् । कम्बोजः । कम्बोजौ ।

No. 1109.—AFTER the word KAMBOJA, there is elision of the *tadrája* affix (No. 1107). Thus *Kamboja* "the king of Kamboja," *kambojau* "two kings of Kamboja."

कम्बोजादिभ्य इति वक्तव्यम् । चोलः । शकः । केरलः । यवनः ।

इत्यपत्याधिकारः ॥

No. 1110.—"IT SHOULD BE SAID (in No. 1109) 'AFTER KAMBOJA AND THE LIKE.'" Thus *chola* "the king of Chola," *śaka* "the king of Scythia," *kerala* "the king of Kerala," *yavana* "the king of Greece."

So much for the subject of Patronymics (or for the division of the Grammar where the words—"in the sense of progeny"—exert an influence—having to be supplied in each rule).

तेन रक्तं रागात् । ४ । २ । १ ।

अण् स्यात् । कषायेण रक्तं वस्त्रं काषायम् ।

No. 1111.—Let *aṇ* come after a word denoting A COLOUR, to signify what is COLOURED THEREBY. Thus *kásháya* "coloured of a dull red"—as cloth.

नक्षत्रेण युक्तः कालः । ४ । २ । ३ ।

अण् स्यात् ।

No. 1112.—Let *aṇ* come (after the name of an asterism) to signify a TIME CONNECTED WITH THE ASTERISM.

तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम् । पुष्येण युक्तं पौषमहः ।

No. 1113.—"IT SHOULD BE MENTIONED THAT THERE IS ELISION OF the Y, WHEN AṆ (No. 1112) COMES AFTER the ASTERISM OF TISHYA OR (as it is also called) PUSHYA." Thus *pausha* "belonging—as a day—to the asterism Pushya"—(i. e. to the month of December, in which month the moon is full in that asterism).

लुबविशेषे । ४ । २ । ४ ।

पूर्वेण विहितस्य लुप् षष्टिदण्डात्मकस्य कालस्यावान्तरविशेषश्चेन्न गम्यते । अद्य पुष्यः ।

No. 1114.—There shall be ELISION (*lup*, No. 209,) of the affix enjoined by the preceding aphorism (No. 1112), IF NO SPECIFICATION is to be understood of an included portion of the time

consisting of twenty-four hours (or sixty *daṇḍas*). Thus *adya pushyah* "to-day belongs to the asterism Pushya"—(meaning by "to-day" neither the day-time in particular, nor the night-time in particular, but both alike).

दृष्टं साम । ४ । २ । ७ ।

तेनेत्येव । वसिष्ठेन दृष्टं वासिष्ठं साम ।

No. 1115.—Let *aṇ* come after what ends with the 3rd case-affix in the sense of SEEN—the thing seen by the one whose name is in the 3rd case, being the SÁMA-VEDA. Thus *vásishṭhaṅ sáma* "the (portion of the) Sáma seen by (or revealed to) Vasishṭha."

वामदेवाड्ड्यड्ड्यौ । ४ । २ । ९ ।

वामदेवेन दृष्टं साम वामदेव्यम् ।

No. 1116.—Let ḌYAT AND ḌYA come AFTER the name VÁMADEVA (under the circumstances set forth in No. 1115). Thus *vámadevya* (No. 260) "the (portion of the) Sáma seen by Vámadeva."

परिवृतो रथः । ४ । २ । १० ।

अस्मिन्नर्थेऽण् प्रत्ययो भवति । वस्त्रेण परिवृतो वास्त्रो रथः ।

No. 1117.—The affix *aṇ* comes (after a word in the 3rd case, in the sense of SURROUNDED—the thing so surrounded being a CHARIOT. Thus *vástra* "surrounded with cloth"—e. g. a chariot.

तत्रोद्धृतममत्रेभ्यः । ४ । २ । १४ ।

शरावे उद्धृतः शाराव ओदनः ।

No. 1118.—The affix *aṇ* comes AFTER words denoting VESSELS, to signify PLACED THEREON. Thus *śaráva* "placed on a shallow dish"—as boiled rice.

संस्कृतं भक्षाः । ४ । २ । १६ ।

सप्तम्यन्तादण् स्यात् संस्कृतेऽर्थे यत् संस्कृतं भक्षाश्चेत् ते स्युः ।
भ्राष्ट्रेषु संस्कृता भ्राष्ट्रा भक्षाः ।

No. 1119.—Let *aṇ* come after what ends with the 7th case-affix, to denote what is PREPARED therein—if that which is so pre-

pared be GRANULAR FOOD. Thus *bhráshṭra* "prepared in frying-pans"—(as barley, &c).

साऽस्य देवता । ४ । २ । २४ ।

इन्द्रो देवताऽस्येति ऐन्द्रं हविः । पाशुपतम् । बार्हस्पत्यम् ।

No. 1120.—An affix comes after the name of ANY DEITY, when something is to be spoken of as HIS. Thus *aindra* "belonging to the deity Indra"—as butter (in an oblation), *páśupata* "belonging to Śiva," *várhaspatya* "belonging to Vṛihaspati."

शुक्राद्घन् । ४ । २ । २६ ।

शुक्रियम् ।

No. 1121.—AFTER the name ŚUKRA, there is the affix GHAN. Thus *śukriya* (Nos. 1120 and 1086) "belonging to Śukra"—as an oblation of butter).

सोमाट्ट्यण् । ४ । २ । ३० ।

सौम्यम् ।

No. 1122.—AFTER the name SOMA, there is the affix ṬYAṆ. Thus *saumya* (No. 1069) "belonging to the Moon"—(as an oblation of butter).

वाय्वृतुपित्रुषसो यत् । ४ । २ । ३१ ।

वायव्यम् । ऋतव्यम् ।

No. 1123.—AFTER VÁYU, ṚITU, PITṚI, AND USHAS, there is the affix YAT. Thus *váyavya* "belonging to the god of the winds," *ṛitavya* "belonging to the seasons"—(as an oblation of butter).

रीङ् ऋतः । ७ । ४ । २७ ।

अकृद्यकारेऽसार्वधातुके यकारे च्वौ च परे ऋतो रीङादेशः । यस्येति च । पित्र्यम् । उषस्यम्

No. 1124.—The substitute OF SHORT ṚI shall be RÍṄ, when an affix, beginning with *y* and not being a *kṛit* (No. 329) nor a *sárvadhátuka* (No. 418), follows, or if *chwi* (No. 1332) follows. Thus,

by No. 260, we have *pitrya* (No. 1123) "belonging to the progenitors," *ushasya* "belonging to the dawn"—(as butter offered in oblation).

पितृव्यमातुलमातामहपितामहाः । ४ । २ । ३६ ।

एते निपात्यन्ते । पितुर्भ्राता पितृव्यः । मातुर्भ्राता मातुलः । मातुः पिता मातामहः । पितुः पिता पितामहः ।

No. 1125.—The word PITṚIVYA "a father's brother," MÁTULA "a mother's brother," MÁTÁMAHA "a mother's father," AND PITÁMAHA "a father's father," are anomalously formed.

तस्य समूहः । ४ । २ । ३७ ।

काकानां समूहः काकम्

No. 1126.—An affix is added to a word, when the sense is a COLLECTION THEREOF. Thus *káka* "a collection of crows."

भिक्षादिभ्योऽण् । ४ । २ । ३८ ।

भैक्षम् । गर्भिणीनां समूहो गार्भिणम् । इह भस्याढे तद्धित इति पुंवद्भावे कृते ।

No. 1127.—The affix AṆ comes AFTER BHIKSHÁ "alms," &c. Thus *bhaiksha* (No. 1126) "what is collected in the shape of alms," *gárbhiṇa* "a collection of pregnant females." In this example the word (*garbhiṇí* "a pregnant woman") having been reduced to the form of the masculine by the supplementary rule, that "the masculine form of a *bha* (No. 185) is substituted, when a *taddhita* affix follows without an indicatory *ḍh*" (the application of No. 979 is debarred by the rule following).

इनण्यनपत्ये । ६ । ४ । १६४ ।

अनपत्यार्थेऽणि इन् प्रकृत्या । तेन नस्तद्धित इति टिलोपो न । युवतीनां समूहो यौवतम् ।

No. 1128.—WHEN the affix AṆ FOLLOWS, NOT IN THE SENSE OF OFFSPRING, the termination IN shall remain in its original shape. Hence (in the case of *gárbhiṇa*, No. 1127) there is not elision of

the last vowel and what follows it by No. 979. Then, again, (as another example of No. 1127) we have (from *yuvatí* "a young woman") *yauvata* (No. 260) "a collection of young women."

ग्रामजनबन्धुभ्यस्तल् । ४ । २ । ४३ ।

तलन्तं स्त्रियाम् । ग्रामता । जनता । बन्धुता ।

No. 1129.—The affix TAL comes AFTER GRÁMA, JANA, AND BANDHU. What ends in *tal* is feminine. Hence *grámatá* (No. 1341) "a collection of villages," *janatá* "a collection of persons," *bandhutá* "a collection of relatives."

गजसहायाभ्यां चेति वक्तव्यम् । गजता । सहायता ।

No. 1130.—"IT SHOULD BE STATED that this (affixing of *tal*—No. 1129) takes place ALSO AFTER GAJA AND SAHÁYA." Thus *gajatá* "a collection of elephants," *saháyatá* "a collection of allies."

अह्नः खः क्रतौ । अहीनः ।

No. 1131.—"The affix KHA comes AFTER AHAN 'a day' IN THE SENSE OF A SACRIFICE." Thus *ahína* (No. 1086) "a particular sacrifice—one lasting a certain number of days."

अचित्तहस्तिधेनोष्ठक् । ४ । २ । ४७ ।

No. 1132.—AFTER things WITHOUT CONSCIOUSNESS, AND HASTI "an elephant," AND DHENU "a milch cow," there is the affix ṬHAK.

इसुसुक्तान्तात् कः । ७ । ३ । ५१ ।

इसुसुक्तान्तात् परस्य ठस्य कः । साक्तुकम् । हास्तिकम् । धैनुकम् ।

No. 1133.—Let K be the substituted of ṬH AFTER WHAT ENDS WITH IS, OR US, OR an UK, OR T. Thus *sáktuka* (No. 1132) "a quantity of flour," *hástika* "a collection of elephants," *dhainuka* "a collection of milch cows."

तदधीते तद्वेद । ४ । २ । ५९ ।

No. 1134.—(Let an affix come after a word denoting some subject of study) IN THE SENSE OF WHO HAS STUDIED THAT, or WHO UNDERSTANDS THAT.

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् । ७ । ३ । ३ ।

पदान्ताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः किंतु ताभ्यां पूर्वौ क्रमादैतावागमौ स्तः । व्याकरणमधीते वेद वा वैयाकरणः ।

No. 1135.—There is NOT *vṛiddhi* (by No. 1069) in the room of what stands AFTER the letters Y AND V, being the FINALS OF PADAS, BUT there are, BEFORE THE TWO, RESPECTIVELY, the two augments AI AND AU. Thus *vaiyákaraṇa* "one who has studied, or who knows, the grammar"—where the *y* of *vyákaraṇa* "grammar" is at the end of a *pada*, inasmuch as the prefix *vi* is one of the Indeclinables—(No. 399).

क्रमादिभ्यो वुन् । ४ । २ । ६१ ।

क्रमकः । पदकः । शिक्षकः । मीमांसकः ।

No. 1136.—AFTER KRAMA, &C., let there be the affix VUN (in the sense of "who knows the thing"). Thus *kramaka* (No. 836) "one who knows the order," *padaka* "one who knows the verses (of the Veda)," *śikshaka* "one who knows one of the six Vedáṅgas," *mímáṅsaka* "one who knows the Mímáṅsá philosophy."

तदस्मिन्नस्तीति देशे तन्नाम्नि । ४ । २ । ६७ ।

उदुम्बराः सन्त्यस्मिन् देशे औदुम्बरो देशः ।

No. 1137.—(An affix is placed after a word expressive of anything) in the sense of—THAT thing IS IN THIS—THE PLACE TAKING A NAME THEREFROM. Thus *audumbara* "a country in which there are glomerous fig-trees."

तेन निर्वृत्तम् । ४ । २ । ६८ ।

कुशाम्बेन निर्वृत्ता नगरी कौशाम्बी ।

No. 1138.—In the sense of what is COMPLETED BY HIM (an affix is placed after the person's name). Thus *kauśámbí* "the city completed by Kuśámba."

तस्य निवासः । ४ । २ । ६९ ।

शिवीनां निवासो देशः शैवः ।

No. 1139.—When the sense is HIS DWELLING-PLACE, (an affix is placed after the person's name). Thus *śaiva* "the country of the Śivis."

अदूरभवश्च । ४ । २ । ७० ।

विदिशाया अदूरभवं वैदिशम् ।

No. 1140.—AND when the sense is WHAT IS NOT FAR OFF therefrom (an affix is placed after the name of a place). Thus *vaidiśa* "what is not far off from the city Vidiśá."

जनपदे लुप् । १ । २ । ५१ ।

जनपदे वाच्ये चातुरर्थिकस्य लुप् ।

No. 1141.—WHEN A COUNTRY is to be expressed, there is ELISION *(lup)* of a "quadruply significant" affix—[i. e. of an affix which conveys the senses specified in Nos. 1137, 1138, 1139, and 1140].

लुपि युक्तवद्व्यक्तिवचने । १ । २ । ५१ ।

लुपि सति प्रकृतिवल्लिङ्गवचने स्तः । पञ्चालानां निवासो जनपदः पञ्चालाः । कुरवः । अङ्गाः । वङ्गाः । कलिङ्गाः ।

No. 1142.—WHEN there is elision by LUP (No. 1141), the GENDER AND NUMBER remain AS IN the ORIGINAL term. Thus *pañcháláh* "the country which is the dwelling-place of the Pañchálas," *kuravah* "the country of the Kurus," *aṅgáh* "the country of the Aṅgas," *baṅgáh* "the country of the Baṅgas," *kaliṅgáh* "the country of the Kaliṅgas."

वरणादिभ्यश्च । ४ । २ । ८२ ।

अजनपदार्थ आरम्भः । वरणानामदूरभवं नगरं वरणाः ।

No. 1143.—AND AFTER the words VARAṆÁ, &c. (elision takes place as directed in No. 1142). The origination of this rule is for the sake of what is not a *country* [like the words referred to in No.

1142]. Thus *varaṇáh* "the city [—not the country—] not far from the country of the Varaṇás."

कुमुदनडवेतसेभ्यो ड्मतुप् । ४ । २ । ८७ ।

No. 1144.—The affix ḌMATUP comes AFTER the words KUMUDA "a lotus," NAḌA "a reed," AND VETASA "a ratan."

झयः । ८ । २ । १० ।

झयन्तान्मतोर्मस्य वः । कुमुद्वान् । नड्वान् ।

No. 1145.— Let there be *v* in the room of the *m* of the affix *matu* (No. 1144) AFTER what ends in A JHAY. Thus *kumudwat* (No. 267) abounding in lotuses," *naḍwat* "abounding in reeds."

मादुपधायाश्च मतोर्वोऽयवादिभ्यः । ८ । २ । ९ ।

मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जितात् परस्य मतोर्मस्य वः । वेतस्वान् ।

No. 1146.—Let there be v in the room OF the *m* of the affix MATU (No. 1144) coming AFTER a word the final of which is M OR A or á, OR THE PENULTIMATE letter OF WHICH IS M OR A or á—but NOT AFTER the word YAVA "barley," &c. Thus *vetaswat* (Nos. 1144 and 267) "abounding in ratans."

नडशादाड्ड्वलच् । ४ । २ । ८८ ।

नड्वलः ।

No. 1147.—AFTER the words NAḌA "a reed" AND ŚÁDA "young grass," there is the affix ḌWALACH. Thus *naḍwala* (No. 267) "abounding with reeds."

शिखाया वलच् । ४ । २ । ८९ ।

शिखावलः ।

इति चातुरर्थिकाः ॥

No. 1148.—AFTER the word ŚIKHÁ "a crest," there is the affix VALACH. Thus *śikhávala* "crested (as a peacock)."

So much or the affixes "quadruply significant" (see No. 1141.)

शेषे । ४ । २ । ९२ ।

अपत्यादिचतुरर्थ्यन्तादन्योऽर्थः शेषस्तत्राणादयः स्युः । चक्षुषा गृह्यते चाक्षुषं रूपम् । श्रावणः शब्दः । औपनिषदः पुरुषः । दृषदि पिष्टा दार्षदाः सक्तवः । चतुर्भिरुह्यते चातुरं शकटम् । चातुर्दश्यां दृश्यते चातुर्दशं रक्षः । तस्य विकार इत्यतः प्राक् शेषाधिकारः ।

No. 1149.—Let a meaning, other than those of which "progeny" (No. 1077) was the first mentioned and the quadruple signification" (No. 1141) the last, be called "the remainder,"—and IN that REMAINDER of senses, too, let there be the affixes *aṇ*, &c. Thus *chákshusha* "visible"—viz. colour, which is apprehended by vision, *śrávaṇa* "audible"—viz. sound, *aupanishada* "treated of in scripture"—viz. soul, *dárshada* "ground on a stone"—viz. the flour of fried corn, *chátura* "ridden in by four persons"—viz. a kind of cart, *cháturdaśa* "who is seen on the fourteenth day of the month"—viz. a goblin.

The regulating influence of the expression "*in the remainder*" extends from this aphorism forward as far as that marked No. 1195.

राष्ट्रावारपाराद्घखौ । ४ । २ । ९३ ।

राष्ट्रे जातादी राष्ट्रियः । अवारपारीणः ।

No. 1150.—AFTER the words RÁSHṬRA "a country" AND AVÁRAPÁRA "both banks," there are respectively, the affixes GHA AND KHA. Thus *ráshṭriya* (No. 1086) "born, &c., in a country," *avárapáríṇa* "who or what goes or extends to both banks."

अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम् । अवारीणः । पारीणः । पारावारीणः । इह प्रकृतिविशेषाद्घादयष्ठ्युट्युलन्ता उच्यन्ते तेषां जातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते ।

No. 1151.—"IT SHOULD BE STATED (in addition to what is stated in No. 1150) WHAT the affix may come AFTER the word AVÁRAPÁRA (not only in the form in which it is there exhibited, but) ALSO WHEN IT IS TAKEN SEPARATELY in pieces, AND when it is INVERTED." Thus *aváríṇa* "belonging to this bank of the river," *páríṇa* "belonging to the other bank," *párávárína* "belonging to the other bank as well as to this."

There shall now be mentioned derivatives which end with those affixes the first whereof is *gha* (No. 1150) and the last whereof are *ṭyu* and *ṭyul* (No. 1171), with specification of the original terms (to which the application of those affixes is appropriate); and their varieties of meaning—such as "being produced therefrom," and the like—shall be mentioned; and also the declensional cases in connection with which the affixes are appropriately applicable.

**ग्रामाद्यखञौ । ४ । २ । ९४ ।**

**ग्राम्यः । ग्रामीणः ।**

No. 1152.—AFTER the word GRÁMA "a village," let there be the affix Y OR KHAÑ. Thus *grámya* or *grámíṇa* (No. 1086) "rustic."

**नद्यादिभ्यो ढक् । ४ । २ । ९७ ।**

**नादेयम् । माहेयम् । वाराणसेयम् ।**

No. 1153.—AFTER the words NADÍ "a river," &c., let there be the affix ḌHAK." Thus *nádeya* (No. 1086) "aquatic," *máheya* "earthen," *váráṇaseya* "belonging to Benares."

**दक्षिणापश्चात्पुरसस्त्यक् । ४ । २ । ९८ ।**

**दाक्षिणात्यः । पाश्चात्यः । पौरस्त्यः ।**

No. 1154.—AFTER the words DAKSHIṆÁ, PAŚCHÁT, AND PURAS, let there be the affix TYAK. Thus *dákshinátya* "produced in the south," *páśchátya* "produced in the west," *paurastya* "produced in the east."

**द्युप्रागपागुदक्प्रतीचो यत् । ४ । २ । १०१ ।**

**दिव्यम् । प्राच्यम् । अपाच्यम् । उदीच्यम् । प्रतीच्यम् ।**

No. 1155.—AFTER DYU "the sky," PRÁCH, APÁCH, UDACH, AND PRATÍCH, let there be the affix YAT. Thus *divya* "celestial," *práchya* "eastern," *apáchya* "southern," *udíchya* (No. 366) "northern," *pratíchya* "western."

**अव्ययात् त्यप् । ४ । २ । १०४ ।**

अमेहक्कतसित्रेभ्य एव । अमात्यः । इहत्यः । क्कत्यः । ततस्त्यः । तत्रत्यः ।

No. 1156.—Let there be the affix TYAP AFTER AN INDECLINABLE—that is to say, however, only after *amá* "together," *iha* "here," *kwa* "where?" and (those that end in) *tasi* (No. 1286) and *tra* (No. 1291). Thus *amátya* "a minister," *ihatya* "produced here," *kwatya* "produced where?" *tatastya* "produced thence," *tatratya* "produced there."

त्यब्नेर्ध्रुवे । नित्यः ।

No. 1157.—"Let TYAP come AFTER the indeclinable NI IN THE SENSE OF CONSTANTLY." Thus *nitya* "eternal."

वृद्धिर्यस्याचामादिस्तद्वृद्धम् । १ । १ । ७३ ।

यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात् ।

No. 1158.—Let THAT whole word AMONG THE VOWELS OF WHICH THE FIRST is A VṚIDDHI be called VṚIDDHA.

त्यदादीनि च । १ । १ । ७४ ।

वृद्धसंज्ञानि स्युः ।

No. 1159.—AND let TYAD, &c., (No. 170) be called *vṛiddha* (No. 1158).

वृद्धाच्छः । ४ । २ । ११४ ।

शालीयः । तदीयः ।

No. 1160.—AFTER a word called VRIDDHA (Nos. 1158 and 1159), let there be the affix CHHA. Thus *śálíya* (Nos. 1086 and 260) "belonging to a hall," *tadíya* "belonging to that."

वा नामधेयस्य । वृद्धसंज्ञा । देवदत्तीयः । दैवदत्तः ।

No. 1161.—"The appellation *vṛiddha* (No. 1158) is OPTIONALLY that OF A PROPER NAME (whether it have a *vṛiddhi* in its first syllable or not)." Thus *devadattíya* (No. 1160) or *daivadatta* "belonging to Devadatta."

**गहादिभ्यश्च । ४ । २ । १३८ ।**

गहीयः ।

No. 1162.—AND AFTER the words GAHA, &c., (there is the affix *chha*—No. 1160). Thus *gahíya* "belonging to a cave."

**युष्मदस्मदोरन्यतरस्यां खञ् च । ४ । ३ । १ ।**

चाच्छः । पक्षेऽण् । युवयोर्युष्माकं वायं युष्मदीयः । अस्मदीयः ।

No. 1163.—AND AFTER YUSHMAD AND ASMAD (No. 170), OPTIONALLY let there be the affix KHAÑ. By the "and" it is meant that the affix may be *chha* (No. 1160); and on the alternative, which is optional, the affix will be *aṇ*. Thus (when the affix *chha* is used) *yushmadíya* "what belongs to you two, or to all of you," *asnadíya* "what belongs to us."

**तस्मिन्नणि च युष्माकास्माकौ । ४ । ३ । २ ।**

युष्मदस्मदोरेतावादेशौ स्तः खञि अणि च । यौष्माकीणः । आस्माकीनः । यौष्माकः । आस्माकः ।

No. 1164.—WHEN THIS affix, viz. *khañ* (No. 1163), is added, AND when AṆ is added, then YUSHMÁKA AND ASMÁKA are the substitutes of *yushmad* and *asmad*. Thus *yaushmákíṇa* "belonging to you," *ásmákína* "belonging to us," (and so, too, with the affix *aṇ*) *yaushmáka* and *ásmáka*.

**तवकममकावेकवचने । ४ । ३ । ३ ।**

एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञि अणि च । तावकीनः । तावकः । मामकीनः । मामकः । छे तु ।

No. 1165.—In the room of *yushmad* and *asmad*, EXPRESSING ONE individual, there are TAVAKA AND MAMAKA, when the affix *khañ* or *aṇ* follows. Thus *távakína* or *távaka* "belonging to thee," *mámakína* or *mámaka* "belonging to me." But when the affix is *chha* (then the rule following applies).

**प्रत्ययोत्तरपदयोश्च । ७ । २ । ९८ ।**

मपर्यन्तयोरनयोरेकार्थवाचिनोस्त्वमौ स्तः प्रत्यये उत्तरपदे च परतः । त्वदीयः । मदीयः । त्वत्पुत्रः । मत्पुत्रः ।

No. 1166.—AND WHEN AN AFFIX follows, OR A WORD IN COMPOSITION, the *twa* and *ma* are put in the room of those two (viz. *yushmad* and *asmad*) as far as the *m* (i. e. in the room of *yushm* and *asm*), when they signify a single individual. Thus *twadíya* "belonging to thee," *madíya* "belonging to me," *twatputra* "thy son," *matputra* "my son."

मध्यान्मः । ४ । ३ । ८ ।

मध्यमः ।

No. 1167.—AFTER the word MADHYA "the middle," there is the affix MA. Thus *madhyama* "middlemost."

कालाट्ठञ् । ४ । ३ । ११ ।

कालिकम् । मासिकम् । सांवत्सरिकम् ।

No. 1168.—AFTER a word expressive of TIME, there is the affix ṬHAÑ. Thus *kálika* (No. 1101) "temporal," *másika* "monthly," *sáṅvatsarika* "annual."

अव्ययानां भमात्रे टिलोपः । सायंप्रातिकः । पौनःपुनिकः ।

No. 1169.—"There is ELISION OF THE LAST VOWEL AND WHAT FOLLOWS IT OF INDECLINABLES, IF ONLY they be entitled to the name of BHA (No. 185)." Thus (from *prátar*) *sáyaṅprátika* "belonging to evening and morning," (and, from *punar*,) *paunahpunika* "happening again and again."

प्रावृष एण्यः । ४ । ३ । १७ ।

प्रावृषेण्यः ।

No. 1170.—AFTER the word PRÁVṚISH "the rainy season," there is the affix EṆYA. Thus *právṛisheṇya* "what belongs to the season of the rains."

सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च । ४ । ३ । २३ ।

सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ।

सायमित्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च कालवाचिभ्यष्ट्युट्युलौ स्त-स्तयोस्तुट् च । सायंतनम् । चिरंतनम् । प्राह्णे प्रगे अनयोरेदन्तत्वं निपात्यते । प्राह्णेतनम् । प्रगेतनम् । दोषातनम् ।

No. 1171.—AFTER the four, *sáyam*, &c.—i. e. after SÁYAM "at eve," CHIRAM "for a long time," PRÁHṆE "in the forenoon," PRAGE "at dawn," AND after INDECLINABLES expressing time, there are the affixes ṬYU AND ṬYUL, AND their augment TUṬ. Thus, *sáyantana* (No. 836) "what is of the evening," *chirantana* "lasting" or "delayed long." In the case of *práhṇe* and *prage* the termination in *e* (in spite of No. 768) is anomalous; and we have *práhṇetana* "what is of the forenoon," and *pragetana* "what is of the early morn." (As an example of the rule applied to an indeclinable expressing time, take) *doshátana* "belonging to the night."

तत्र जातः । ४ । ३ । २५ ।

सप्तमीसमर्थाज्जात इत्यर्थेऽणादयो घादयश्च स्युः । स्रुघ्ने जातः । स्रौघ्नः । उत्से जातः । औत्सः । राष्ट्रे जातः । राष्ट्रियः । अवार-पारे जातः । अवारपारीणः । इत्यादि ।

No. 1172.—Let there be the affixes *aṇ*, &c., and *gha*, &c., in the sense of PRODUCED THEREIN, after what in the 7th case is in grammatical relation (as the locality). Thus *sraughna* "born in Srughna," *autsa* "born in Utsa," *ráshṭriya* "born in a country," *avárapáríṇa* (No. 1150) "born on this or the opposite bank:"—and so of others.

प्रावृषष्ठप् । ४ । ३ । २६ ।

एण्यापवादः । प्रावृषिकः ।

No. 1173.—AFTER PRÁVṚISH "the rainy season" let there be the affix ṬHAP (when the sense is that of "produced in"). This debars *eṇya* (No. 1170).—Thus *právṛishika* (No. 1101) "produced in the rainy season."

प्रायभवः । ४ । ३ । ३९ ।

तत्रेत्येव । स्रुघ्ने प्रायेण बाहुल्येन भवति । स्रौघ्नः ।

No. 1174.—[The affixes *aṇ*, &c. may come] when the sense is BEING MUCH—but only after that denoting "where." Thus *sraughna* "what is much—i. e. what is abundant—in Srughna."

संभूते । ४ । ३ । ४१ ।

स्रुघ्ने संभवति । स्रौघ्नः ।

No. 1175.—[The affixes *aṇ*, &c. may come] when the sense is ADAPTED. Thus *sraughna* "what is suited to the country of Srughna."

कोशाड्ढञ् । ४ । ३ । ४२ ।

कौशेयं वस्त्रम् ।

No. 1176.—AFTER the word KOŚA "cocoon of the silkworm" let there be the affix ḌHAÑ. Thus *kauśeya* "silken"—clothes.

तत्र भवः । ४ । ३ । ५३ ।

स्रौघ्नः । औत्सः । राष्ट्रियः ।

No. 1177.—(The affixes *aṇ*, &c. may come) when the sense is WHO STAYS THERE. Thus *sraughna* "who stays in Srughna," *autsa* "who stays in Utsa," *ráshṭriya* "who stays in a kingdom."

दिगादिभ्यो यत् । ४ । ३ । ५४ ।

दिश्यम् । वर्ग्यम् ।

No. 1178.—AFTER the word DIŚ, &c., let there be the affix YAT. Thus *diśya* "lying in a particular tract or quarter," *vargya* "belonging to a class."

शरीरावयवाच्च । ४ । ३ । ५५ ।

दन्त्यम् । कण्ठ्यम् । अध्यात्मादेष्ठञिष्यते । अध्यात्मं भवमाध्यात्मिकम् ।

No. 1179.—AND AFTER what denotes A PART OF THE BODY (let there be the affix *yat*). Thus *dantya* "dental," *kaṇṭhya* "guttural."

It is wished (by Patañjali) that after the words *adhyátman* "a minister of soul," &c., there should be the affix *ṭhañ*. Thus *ádhyátmika* "relating to one of the ministers of soul" [as spoken of in the Sáñhya philosophy].

**अनुशतिकादीनां च । ७ । ३ । २० ।**

एषामुभयपदवृद्धिर्ञिति णिति किति च । आधिदैविकम् । आधिभौतिकम् । ऐहलौकिकम् । आकृतिगणोऽयम् ।

No. 1180.—AND, AFTER the words ANUŚATIKA "about a hundred," &c., when an affix with an indicatory *ñ* or *ṇ* or *k* comes, let a *vṛiddhi* be the substitute of the vowel in both members of the compound. Thus—in those terms of the Sáñkhya—(from *adhideva* "a presiding deity") *ádhidaivika* "dependent on a presiding deity," (from *adhibhúta* the province of an organ" *ádhibhautika* "having reference to the province of an organ," (from *ihaloka* "the world here") *aihalaukika* "relating to this world." This is a class of words (see No. 53) the fact of a word's belonging to which is known only from its form.

**जिह्वामूलाङ्गुलेश्छः । ४ । ३ । ६२ ।**

जिह्वामूलीयम् । अङ्गुलीयम् ।

No. 1181.—AFTER the words JIHWÁMÚLA AND AÑGULÍ, let there be the affix CHHA. Thus *jihwámúlíya* (No. 1086) "residing in the root of the tongue," *aṅgulíya* "residing in the fingers."

**वर्गान्ताच्च । ४ । ३ । ६३ ।**

कवर्गीयम् ।

No. 1182.—AND AFTER WHAT ENDS WITH VARGA (let there be the affix *chha*). Thus *kavargíya* (No. 1086) "belonging to the class of *k*"—(i. e. a guttural letter—see No. 17).

**तत आगतः । ४ । ३ । ७४ ।**

स्रौघ्नादागतः । स्रौघ्नः ।

No. 1183.—[Let there be the affix *aṇ*, &c.] when the sense is WHAT HAS COME THENCE. Thus *sraughna* "what has come from Srughna."

**ठगायस्थानेभ्यः । ४ । ३ । ७५ ।**

शुल्कशालाया आगतः शौल्कशालिकः ।

No. 1184.—AFTER words denoting SOURCES OF REVENUE, let there be the affix ṬHAK. Thus *śaulkaśálika* (No. 1101) "what is derived from the custom-house."

**विद्यायोनिसंबन्धेभ्यो वुञ् । ४ । ३ । ७७ ।**

औपाध्यायकः । पैतामहकः ।

No. 1185.—AFTER words relating to LEARNING AND family ORIGIN, let there be the affix VUÑ. Thus *aupádhyáyaka* (No. 836) "derived from a spiritual teacher," *paitámahaka* "derived from a grandfather."

**हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः । ४ । ३ । ८१ ।**

समादागतं समरूप्यम् । पक्षे गहादित्वाच्छः । समीयम् । देवदत्तरूप्यम् । दैवदत्तम् ।

No. 1186.—AFTER words denoting CAUSES AND MEN (viewed as causes), there may be OPTIONALLY the affix RÚPYA. Thus *samarúpya* "what proceeds from a like cause." On the other alternative, there is after this word the affix *chha*, from No. 1162. Thus *samíya* (No. 1086). So, again, *devadattarúpya* or *daivadatta* "what originates with Devadatta."

**मयट् च । ४ । ३ । ८२ ।**

सममयम् । देवदत्तमयम् ।

No. 1187.—AND (under the circumstances specified in No. 1186) there may be the affix MAYAṬ. Thus *samamaya* "consisting of the same," *devadattamaya* "in the form of Devadatta."

**प्रभवति । ४ । ३ । ८३ ।**

हिमवतः प्रभवति हैमवती गङ्गा ।

No. 1188.—The affixes *aṇ*, &c., may come when the sense is what TAKES ITS RISE. Thus *haimavatí* "which takes its rise in the snowy range"—meaning the river Ganges.

तद्गच्छति पथिदूतयोः । ४ । ३ । ८५ ।

स्रुघ्नं संगच्छति स्रौघ्नः । पन्था दूतो वा ।

No. 1189.—[The affixes *aṇ*, &c., may come] when the meaning is WHAT GOES THERETO—PROVIDED THIS BE A ROAD OR a MESSENGER. Thus *sraughna* "that goes to Srughna"—i. e. the road to Srughna or a messenger to Srughna.

अभिनिष्क्रामति द्वारम् । ४ । ३ । ८६ ।

स्रुघ्नमभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वारम् ।

No. 1190.—[The affixes *aṇ*, &c., may come] when the meaning is THE GATE THAT FACES. Thus *sraughna* "which looks towards Srughna"—as one of the gates of Kányakubja does.

अधिकृत्य कृते ग्रन्थे । ४ । ३ । ८७ ।

शारीरकमधिकृत्य कृतो ग्रन्थः शारीरकीयः ।

No. 1191.—When the meaning is A BOOK MADE IN SUBSERVIENCE [to any subject, then the affixes *aṇ*, &c., may come after what denotes that subject]. Thus *śárírakíya* "psychological"—meaning a book made with reference to the incorporate soul.

सोऽस्य निवासः । ४ । ३ । ८९ ।

स्रुघ्नो निवासोऽस्य स्रौघ्नः ।

No. 1192.—[The affixes *aṇ*, &c., may come] when the meaning it that THIS IS HIS DWELLING-PLACE. Thus *sraughna* "an inhabitant of Srughna."

तेन प्रोक्तम् । ४ । ३ । १०१ ।

पाणिनिना प्रोक्तं पाणिनीयम् ।

No. 1193.—[The affixes *aṇ*, &c., may come] when the meaning is what was enounced by him. Thus *páṇiníya* "(the system of grammar) enounced by Páṇini."

तस्येदम् । ४ । ३ । १२० ।

उपगोरिदमौपगवम् ।

इति शैषिकाः ॥

No. 1194.—[The affixes *aṇ*, &c., may come] when the meaning is that THIS is HIS. Thus *aupagava* "which belongs to Upagu."

So much for those affixes that convey the meanings referred to under No. 1149.

तस्य विकारः । ४ । ३ । १३४ ।

No. 1195.—[The affix *aṇ*, may come] when the meaning is A MODIFICATION or product THEREOF.

अश्मनो विकारे टिलोपः । अश्मनो विकार आश्मः । भास्मनः । मार्त्तिकः ।

No. 1196.—" There is ELISION OF THE LAST VOWEL WITH WHAT FOLLOWS IT OF the word AŚMAN "a stone," WHEN the meaning is A PRODUCT thereof"—(No. 1195). Thus *áśma* "made of stone," [and then by No. 1195] *bhásmana* "made of ashes," *márttika* "made of earth.".

अवयवे च प्राण्योषधिवृक्षेभ्यः । ४ । ३ । १३५ ।

चाद्विकारे । मयूरस्यावयवो विकारो वा मायूरः । मौर्वम् । काण्डं भस्म वा । पैप्पलम् ।

No. 1197.—AND [the affix *aṇ*, &c., may come] AFTER a word denoting AN ANIMAL, AND a deciduous PLANT, AND a TREE, WHEN the meaning is A PART. By the "and" it is meant that the sense may be also a product—(No. 1195). Thus *máyúra* "being part of a peacock" or "made of a peacock" [—as a fan made of its feathers], *maurva* "of the Sanseviera zeylanica"—the stalk or the ashes,—*paippala* "of the Pípal-tree."

मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः । ४ । ३ । १४३ ।

प्रकृतिमात्रान्मयड्वा स्याद्विकारावयवयोः । अश्ममयम् । आश्मनम् । अभक्ष्येत्यादि किम् । मौद्गः सूपः । कार्पासमाच्छादनम् ।

No. 1198.—IN SECULAR LANGUAGE let the affix MAYAṬ come OPTIONALLY after any primitive IN THOSE TWO meanings—viz. product (No. 1195) and part (No. 1197), WHEN NEITHER FOOD NOR CLOTHING is spoken of. Thus *aśmamaya* or (by No. 1098) *áśma-*

*na* "made of stone." Why do we say "when neither food nor clothing is spoken of?" Witness *maudga* "made of kidney-beans"—as soup—[where the affix is *aṇ*—not *mayaṭ*]; and *kárpása* "made of cotton"—as clothing.

नित्यं वृद्धशरादिभ्यः । ४ । ३ । १४४ ।

आम्रमयम् ।

No. 1199.—[The affixing of *mayaṭ*, which is optional in the case of the words specified in No. 1198, takes place] INVARIABLY, AFTER WORDS THAT HAVE VṚIDDHI IN THE FIRST SYLLABLE (No. 1158), AND after the words ŚARA "a reed," &c. Thus *ámramaya* "consisting of mango-trees."

गोश्च पुरीषे । ४ । ३ । १४५ ।

गोमयम् ।

No. 1200.—AND [there is the affix *mayaṭ*] AFTER the word GO "a cow," IN THE SENSE OF its DUNG. Thus *gomaya* "cow-dung."

गोपयसोर्यत् । ४ । ३ । १६० ।

गव्यम् । पयस्यम् ।

इति प्राग्दीव्यतीयाः ॥

No. 1201.—AFTER the words GO "a cow" AND PAYAS "milk," let there be the affix YAT. Thus *gavya* (No. 31) "being part of a cow," *payasya* "made of milk."

So much for the affixes that convey the meanings referred to under No. 1068.

प्राग्वहतेष्ठक् । ४ । ४ । १ ।

तद्वहतीत्यतः प्राक् ठगधिक्रियते ।

No 1202.—[In each aphorism] from this one FORWARD TO No. 1218, the affix ṬHAK bears rule.

तेन दीव्यति खनति जयति जितम् । ४ । ४ । २ ।

अक्षैर्दीव्यति खनति जयति जितं वा आक्षिकम् ।

No. 1203.—[Let there be the affix *ṭhak*, No. 1202] when the sense is WHO PLAYS, DIGS, CONQUERS, or IS CONQUERED THEREWITH

Thus *ákshika* (No. 1101) "a dicer"—i. e. who plays, conquers, or is conquered, with dice—[and so, from a word signifying an instrument for digging, may be formed what will signify "who digs therewith"].

संस्कृतम् । ४ । ४ । ३ ।

दध्ना संस्कृतं दाधिकम् । मारिचिकम् ।

No. 1204.—[So, too—No. 1202—] when the sense is what is COMPOSED thereof. Thus *dádhika* "made of curds," *márichika* "made of pepper."

तरति । ४ । ४ । ५ ।

उडुपेन तरति । औडुपिकः ।

No. 1205.—[So, too—No. 1202—] when the sense is WHO CROSSES therewith. Thus *auḍupika* "who crosses by means of a raft."

चरति । ४ । ४ । ८ ।

हस्तिना चरति हास्तिकः । दध्ना चरति दाधिकः ।

No. 1206.—[So, too—No. 1202—] when the sense is WHO GOES ON by means thereof. Thus *hástika* "who travels by an elephant," *dádhika* "who gets on with [—being fed on—] curds."

संसृष्टे । ४ । ४ । २२ ।

दध्ना संसृष्टं दाधिकम् ।

No. 1207.—[So, too—No. 1202—] when the sense is SMEARED therewith. Thus *dádhika* "smeared with curds."

उञ्छति । ४ । ४ । ३२ ।

बदराण्युञ्छति बादरिकः ।

No. 1208.—[So, too—No. 1202—] when we speak of him WHO GLEANS. Thus *bádarika* "who picks up jujubes."

रक्षति । ४ । ४ । ३३ ।

समाजं रक्षति सामाजिकः ।

No. 1209.—[So, too—No. 1202—] when we speak of him WHO AIDS. Thus *sámájika* "who aids an assembly"—as a spectator—[—as the French say—"qui assiste á"].

शब्ददर्दुरं करोति । ४ । ४ । ३४ ।

शब्दं करोति शाब्दिकः । दर्दुरं करोति दार्दुरिकः ।

No. 1210.—[So, too—there is the affix *ṭhak* as directed in No. 1202, after the words *śabda* "sound" and *dardura* "croaking,"] when we speak of WHAT MAKES A SOUND OR A CROAKING. Thus *śábdika* "what makes a sound," *dárdurika* "what makes a croaking."

धर्मं चरति । ४ । ४ । ४१ ।

धार्मिकः ।

No. 1211.—[So, too, there is the affix *ṭhak* after the word *dharma* "duty"] when we speak of him WHO PRACTISES duty. Thus *dhármika* "dutiful."

अधर्माच्चेति वक्तव्यम् । आधर्मिकः ।

No. 1212.—"IT SHOULD BE STATED THAT the affix (No. 1211) comes ALSO AFTER the word ADHARMA." Thus *ádharmika* "undutiful."

शिल्पम् । ४ । ४ । ५५ ।

मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः ।

No. 1213.—[So, too—No. 1202—] when we speak of one whose ART is related thereto. Thus *márdaṅgika* "a drummer"—whose calling is to sound the drum.

प्रहरणम् । ४ । ४ । ५७ ।

असिः प्रहरणमस्य आसिकः । धानुष्कः ।

No. 1214.—[So, too—No. 1202—] when we speak of one whose WEAPON it is. Thus *ásika* "a swordsman," *dhánushka* "a bowman."

शीलम् । ४ । ४ । ६१ ।

अपूपभक्षणं शीलमस्य आपूपिकः ।

No. 1215.—[So, too—No. 1202—] when we speak of one whose HABIT is related thereto. Thus *ápúpika* "one whose habit is to eat cakes."

निकटे वसति । ४ । ४ । ७३ ।

नैकटिको भिक्षुकः ।

इति ठगधिकारः ॥

No. 1216.—[So, too—No. 1202—*ṭhak* comes after the word *nikaṭa* "neighbouring"] when we speak of one WHO DWELLS NEAR. Thus *naikaṭika* "living near"—for example, a beggar.

So much for the rules in which the affix *ṭhak* is understood.

प्राग्घिताद्यत् । ४ । ४ । ७५ ।

तस्मै हितमित्यतः प्राग्यदधिक्रियते ।

No. 1217.—[In each aphorism] from this one FORWARD TO No. 1226, the affix YAT bears rule.

तद्वहति रथयुगप्रासङ्गम् । ४ । ४ । ७६ ।

रथं वहति रथ्यः । युग्यः । प्रासङ्ग्यः ।

No. 1218.—[Let there be the affix *yat*—No. 1217—] when we speak of WHAT BEARS IT—the thing borne being A CAR, a YOKE, OR a BREAK. Thus *rathya* "a carriage-horse," *yugya* "bearing the yoke," *prásangya* "being trained in a break,"

धुरो यड्ढकौ । ४ । ४ । ७७ ।

धुर्यः । धौरेयः ।

No. 1219.—AFTER DHUR "a load," let there be YAT OR ḌHAK Thus *dhurya* or *dhaureya* (No. 1086) "a beast of burden."

नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु । ४ । ४ । ९१ ।

नावा तार्यं नाव्यं जलम् । वयसा तुल्यो वयस्यः । धर्मेण प्राप्यं धर्म्यम् । विषेण वध्यः विष्यः । मूलेन आनाम्यं मूल्यम् । मूलेन समो मूल्यः । सीतया समितं सीत्यं क्षेत्रम् । तुलया संमितं तुल्यम् ।

No. 1220.—(Let *yat* come) AFTER the words NAU "a boat," VAYAS "age," DHARMA "merit," VISHA "poison," MÚLA "a root" MÚLA "something bought," SÍTÁ "a furrow," AND TULÁ "a balance," when the senses of the derivatives, respectively, are "TO BE CROSSED," "LIKE," "ATTAINABLE." "TO BE PUT TO DEATH," "TO BE BENT DOWN," "EQUIVALENT TO," "MEASURED OUT," AND "EQUALLY MEASURED." Thus *návya* "that can be crossed by a boat—water," *vayasya* "one of like age," *dharmya* (No. 260) "attainable through merit," *vishya* "to be put to death by poison," *múlya* "to be bent down from the root," *múlya* "the price equivalent to something bought," *sítya* (No 260) "measured out by furrows"—a field (ploughed), *tulya* meted by a balance so as to be equal (to something else)."

तत्र साधुः । ४ । ४ । ९८ ।

सामसु साधुः सामन्यः । कर्मण्यः । शरण्यः ।

No. 1221.—(Let there be *yat*) when the sense is who is EXCELLENT IN REGARD THERETO. Thus *sámanya* "conversant with the Sáma-Veda," *karmaṇya* "fit for any act," *śaraṇya* "good for refuge."

सभाया यः । ४ । ४ । १०५ ।

सभ्यः ।

इति यतोऽवधिः ॥

No. 1222.—AFTER the word SABHÁ "an assembly," let there be the affix YAT. Thus *sabhya* (No. 620) "an assessor."

So much for the application of the affix *yat* (No. 1217).

प्राक्क्रीताच्छः । ५ । १ । १ ।

तेन क्रीतमित्यतः प्राक् छोऽधिक्रियते ।

No. 1223.—(In each aphorism) from this one FORWARD TO No. 1231, the affix CHHA bears rule.

उगवादिभ्यो यत् । ५ । १ । २ ।

उवर्णान्ताद्गवादिभ्यश्च यत् । छस्यापवादः । शङ्कव्यं दारु । गव्यम् ।

No. 1224.—AFTER what ends in U or *ú*, AND after the words GO, &c., there be the affix YAT. This debars *chha* (No. 1223). Thus *śaṅkavya* (No. 1078) "fit for a stake"—wood, *gavya* "suitable for cows."

नाभि नभं च । नभ्योऽक्षः । नभ्यमञ्जनम् ।

No. 1225.—" AND NABHA substituted FOR NÁBHI " the nave of a wheel" (should be mentioned under No. 1224). Thus *nabhya* "suitable for the nave of a wheel"—as the axle, or the grease for greasing it.

तस्मै हितम् । ५ । १ । ५ ।

वत्सेभ्यो हितो वत्सीयो गोधुक् ।

No. 1226.—[Let there be *chha*] when we speak of what is SUITABLE FOR THAT. Thus *vatsíya* "who is fit for (having the charge of) calves"—as a cow-milker.

शरीरावयवाद्यत् । ५ । १ । ६ ।

दन्त्यम् । कण्ठ्यम् । नस्यम् ।

No. 1227.—AFTER a word denoting A PART OF THE BODY, let there be the affix YAT. Thus *dantya* " suitable for the teeth," *kaṇṭhya* " suitable for the throat," NASYA "suitable for the nose."

आत्मन्विश्वजनभोगोत्तरपदात् खः । ५ । १ । ९ ।

No. 1228.—AFTER the words ÁTMAN, VIŚWAJANA, AND after BHOGA as the FINAL TERM in a compound, let there be the affix KHA.

आत्माध्वानौ खे । ६ । ४ । १६९ ।

एतौ खे प्रकृत्या स्तः । आत्मने हितमात्मनीनम् । विश्वजनीनम् । मातृभोगीणः ।

इति क्यतोः पूर्णोऽवधिः ॥

No. 1229.—These two words ÁTMAN "soul" AND ADHWAN "a road," WHEN the affix KHA FOLLOWS, remain in their primitive form. Thus *átmanína* (Nos. 1228 and 1086) "suitable for one's self," *viśwajanína* "suitable for all men," *mátṛibhogíṇa* "fit to be possessed by the mother."

Here the extent of the [application of the] affixes *chha* (No. 1223) and *yat* (No. 1217) is completed.

प्राग्वतेष्ठञ् । ५ । १ । १८ ।

तेन तुल्यमित्यतः प्राक् ठञधिक्रियते ।

No. 1230.—[In each aphorism] from this one FORWARD TO No. 1237, the affix ṬHAÑ bears rule.

तेन क्रीतम् । ५ । १ । ३७ ।

सप्तत्या क्रीतं साप्ततिकम् । प्रास्थिकम् ।

No. 1231.—[Let there be the affix *ṭhañ*—No. 1230—] when we speak of what is BOUGHT THEREWITH. Thus *sáptatika* (Nos. 260 and 1101) "bought with seventy," *prásthika* "bought for a *prastha* "[—i. e. for that measure of grain or the like].

तस्येश्वरः । ५ । १ । ४२ ।

सर्वभूमिपृथिवीभ्यामणञौ स्तः । अनुशतिकादीनां च । सर्वभूमेरीश्वरः सार्वभौमः । पार्थिवः ।

No. 1232.—When we speak of THE LORD THEREOF, the affixes *aṇ* and *añ*, respectively, come after the words *sarvabhúmi* "the whole earth," and *prithiví* "the earth." In accordance with No. 1180 [a *vṛiddhi* being the substitute of the vowel in both members of the compound] we have *sárvabhauma* (No. 1232) "the lord of the whole earth," *párthiva* "a lord of the earth."

पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् । ५ । १ । ५९ ।

एते रूढशब्दा निपात्यन्ते ।

No. 1233.—The following words, the sense of which has no relation to their etymology, are anomalous—viz. PAÑKTI "a line,"

VIŃŚATI "twenty," TRIŃŚAT "thirty," CHATWÁRIŃŚAT "forty," PAŃCHÁŚAT "fifty," SHASHṬI "sixty," SAPTATI "seventy," AŚÍṬI "eighty," NAVATI "ninety," AND ŚATA "a hundred."

तदर्हति । ५ । १ । ६३ ।

श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः ।

No. 1234.—[These may be *ṭhań*—as in No. 1231] when we speak of one who DESERVES THAT. Thus *śwaitachchhatrika* "who deserves a white umbrella."

दण्डादिभ्यो यः । ५ । १ । ६६ ।

एभ्यो यः । दण्डमर्हति दण्ड्यः । अर्घ्यः । वध्यः ।

No. 1235.—AFTER the word DAṄḌA "a fine," &c. let there be the affix YA. Thus *daṇḍya* "deserving to be fined," *arghya* "deserving worship," *vadhya* "deserving to be killed."

तेन निर्वृत्तम् । ५ । १ । ७९ ।

अह्ना निर्वृत्तमाह्निकम् ।

इति ठञोऽवधिः ॥

No. 1236.—[There may be *ṭhań*—as in No. 1231—] when we speak of that is ACCOMPLISHED BY MEANS THEREOF. Thus *áhnika* "to be accomplished in a day"—(a certain portion of reading).

Thus far is the extent of the affix *ṭhań* (No. 1230).

तेन तुल्यं क्रिया चेद्वतिः । ५ । १ । ११५ ।

ब्राह्मणेन तुल्यं ब्राह्मणवदधीते । क्रिया चेत् किम् । गुणतुल्ये मा भूत् । पुत्रेण तुल्यः स्थूलः ।

No. 1237.—Let the affix VATI be added, when we speak of what is LIKE THERETO—PROVIDED [the likeness have reference to] an ACTION. Thus *bráhmaṇavad* (No. 399) *adhíte* "he studies like a Bráhman." Why do we say "provided the likeness have reference to an action?" Because this does not apply when the likeness has reference to a quality:—thus *putreṇa tulyaḥ sthúlaḥ* "large like (i. e. as large as) the son."

**तत्र तस्येव । ५ । १ । ११६ ।**

मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः। चैत्रस्येव चैत्रवन्मैत्रस्य गावः।

No. 1238.—[The affix *vati* may be employed—as in No. 1237 when we speak of something as being] LIKE what is THEREIN OR THEREOF. Thus *mathurávat* "like that in Mathurá"—speaking of the rampart of Srughna; *chaitravat* "like those of Chaitra"—speaking of Maitra's cows.

**तस्य भावस्त्वतलौ । ५ । १ । ११९ ।**

प्रकृतिजन्यबोधे प्रकारो भावः । गोर्भावो गोत्वम् । त्वान्तं क्लीबम् ।

No 1239.—Let the affixes TWA AND TAL come [after a word denoting anything] when we speak of THE NATURE (or genus) THEREOF. By "nature" we mean that which differences [from knowledge in general] the knowledge produced by [what is denoted by] the primitive Thus *gotwa* "the nature of a cow" [—this being that which renders special the knowledge produced by the consideration of a cow, or which renders the knowledge different from the knowledge produced by the consideration of anything else than a cow]. What ends in *twa* is neuter.

**आ च त्वात् । ५ । १ । १२० ।**

